CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुसम्भवः

आन्ध्रकाव्यस्यानुवादः

अनुवादिता

कुण्डिमहि शेषशर्मा



आन्ध्रप्रदेशसाहित्यअकाडेमीसंस्थया

प्रकाशितः

१९६८

मूल्यम् रू ३-५०

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

7062

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुसम्भवः

आन्ध्रकाव्यस्यानुवादः

अनुवदिता

कुण्टिमद्दि शेषशर्मा

आन्ध्रप्रदेशसाहित्यअकाडेमीसंस्थया

प्रकाशितः

१९६८

मूल्यम् रू ३–५०

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथममुद्रणम्

१०००

KAMAL PRINTERS
Bakaram, Hyderabad

श्रीहयग्रीवाय नमः
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्वेताम्भोजवराटकासनगतं गन्धर्ववक्त्रं करै-
श्चक्रं शङ्खमथारविन्दमपि चिन्मुद्रां दधानं हरिम् ।

क्षीरम्भोधिसुताश्रिताङ्कमतुलं श्वश्रेयसस्याप्तये
विद्यानामधिदैवतं सविनयं निश्रेयसायाश्रये ।।

——

प्रस्तावना

श्रीकृष्णराजेन्द्रसभाकविदिग्गजशेखरः ।
अल्लसान्यन्वयाब्धीन्दुः कविलोकदिवाकरः ।।

शिरीषकुसुमस्पर्धिकविताचतुराननः ।
'मनुसम्भव' निर्माणसमार्जितमहायशाः ।।

आशुधाराकवित्वाप्तगण्डपेण्डेरभूषितः ।
सार्वभौमभुजारूढशिविकादण्डमण्डितः ।।

बिरुदेनान्ध्रकवितापितामह इति स्तुतः ।
अद्यापि कीर्तिकायेन पेद्दनार्यो विराजते ।।

रचितं तेन कविना 'मनुसम्भव'नामकम् ।
श्रीकुण्टिमद्द्यभिजनः शेषशर्माभिधानकः ।।

श्रीनिवासाचार्यपौत्रो रङ्गाचार्यतनूभवः ।
शठमर्षणगोत्रीयो लक्ष्मीजानिपदाश्रितः ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आन्ध्रगीर्वाणभारत्यो रचिताने कका व्यकः ।
गैर्वाण्याऽनुवदत्यद्य विश्वेषां च नृणां मुदे ।।

वेदान् साङ्गांश्च शास्त्राणि दर्शनानि स्मृतीस्तथा ।
दृश्यश्रव्यणि काव्यानि यदनूद्य समार्जितम् ।।

मनाग्य।यत्यते नूनमाधमर्ण्यमपोहितुम् ।
प्रख्यातुं च।न्ध्र सुकवेः प्रतिभां विषयान्तरे ।।

सुगुणा यदि विद्यन्ते मूलकर्तुस्तु ते समे ।
दोषाश्चेदनुवक्तुः स्युर्दोषज्ञाः क्षन्तुमर्हथ ।।

वाल्मीकिप्रभृतीन्नत्वा गीर्वाणकवितल्लजान् ।
नन्नयाद्यान्ध्रसुकवीन् पेद्दनार्यं पुनः पुनः ।।

श्रीमत्पितामहं श्रीनिवासाचार्यगुरूत्तमम् ।
श्रीसेङ्कटेशगीर्वाणकलाशालागुरून् समान् ।।

मनुसम्भवाख्यचम्पूमहाकाव्यं चिकीर्षति ।
शेषशर्ताभिधानोऽयं पश्यन्तु रसिकोत्तमाः ।।

शोभकृच्चैत्रपञ्चम्यां ज्येष्ठोडौ रविवासरे ।
अग्न्यृतुग्रहचन्द्राङ्के वर्षे मासि चतुर्थके ।।

चतुर्दशदिने चोपक्रान्ता क्रीस्तुशके कृतिः ।
स्वप्नोपबद्ध 'वरणाद्वीपव'त्यादिना पदा ।।

धर्मवरमु

कुण्टिमद्दि शेषशर्मा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुसम्भवः

प्रथमः सर्गः

१. श्रीकान्तास्तनसम्भृते मृगमदे स्वोरःस्थले भास्वरे
"विष्णुः श्रीसविधे निवेशयति किं ? सर्वंसहां कौतुकात्"।
इत्थं भक्तिनमत्सनन्दनमुखैर्वन्दारुवृन्दारकैः
शङ्क्यः पङ्कजलोचनो वितरताच्छ्रेयांसि भूयांसि नः ॥

२. वरणाद्वीपवतीतटाञ्चलतले वप्रैर्युताऽभ्रङ्कषैः
सदनैर्हीरमरीचिवीचिधवलीभूतोडुराण्यद्रुकुभिः ।
रुचिरा काऽप्यरुणास्पदाख्यनगरी विन्ध्यस्य मध्यस्थले
तुहिनाद्रेः क्षितिकण्ठहारतरलस्फूर्त्या च देदीप्यते ॥

३. विधिं न बहुमन्यन्ते जराविकलसंविदम् ।
तत्र विप्रास्सर्वशास्त्रकूलङ्कषमनीषिणः ॥

४. मण्डितास्सङ्गरकिणै राजानो रणपण्डिताः ।
भृत्येन तत्र सन्दिश्य भार्गवानयने क्षमाः ॥

५. ऊरव्यास्तत्र सञ्जाताः सत्यानृतविशारदाः ।
नीवीं वितीर्यालकेशकुबेरभरणोल्बणाः ॥

६. हल्याग्रलब्धविभवास्तत्रत्याः पादसम्भवाः ।
आदिभिक्षोश्च कुशला भैक्ष्यचर्यानिवारणे ॥

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७. रम्भाद्यप्सरसोनाटचकलागर्वनिवर्हणे ।
हेलाविक्रान्तचरणास्तत्रत्या वारयोषितः ।।

८. अध्यास्ते तां रतिपतिनिशानाथहृद्यस्वरूपो
भाषाऽनन्तो विविधसवनाचारदीक्षारतश्च ।
नित्यं वेदाध्ययनकुशलो ब्रह्मवंशावतंसः
ख्यातो नाम्ना प्रवर इति चालेख्यलावण्यमूर्तिः ।।

९. सौन्दर्यं तस्य वैराग्यात्पुंश्चलीनां मुधाऽभवत् ।
भृङ्गीणां भोगविधुरं चम्पकस्य सुमं यथा ।।

१०. यज्वा सन्नपि यौवने स धनवान् गार्हस्थ्यनिर्वाहको
दारैः स्वीयगुणानुरूपललितैस्सन्तोषसौख्यावहैः ।
ताते मातृयुते शचीपतिसमे संसारभारक्षमे
कालं सज्जनसेवया नयति सद्गोष्ठ्या महान्तं द्रुतम् ।।

११. विप्रोऽसौ वरणानदीदरदलत्पङ्केजधूलीयुते
वाते सर्पति वामनस्तुतिपरश्चोत्थाय गत्वा नदीम् ।
स्नात्वा चाप्यघमर्षणानि च पठन् सन्ध्यामुपास्यादरा-
त्साष्टाङ्गं सिकतातले दिनमणिं नन्नम्यते भक्तितः ।।

१२. आचार्योदितवेदमन्त्रनिचयानावर्तयद्भिस्समं
शिष्टैः स्नातकृताह्निकैर्धृतसमिद्दर्भप्रसूनादिभिः ।
स्वच्छार्द्रोद्गमनीयभासुरकरैरायान्तमेनं द्विजो-
त्तंसं गौरवभारभुग्ननयनाः पश्यन्ति रथ्याजनाः ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१३. शीलं तस्य शमं दमं नववयस्सौन्दर्यमप्यन्वयं
दृष्ट्वा पात्रधिया तमभ्युपगते कस्मिंश्चिदुर्वीपतौ ।
सालग्राममहो जिघृक्षति न वा मान्योर्वराव्रीहिभि-
र्गेहं तस्य गवां पयस्यनिकरैर्नित्यं वरीवृध्यते ।।

१४. पचति गृहे तज्जाया परिवेविष्टे च भोजयति चान्नम् ।
तुल्याऽन्नपूर्णयाऽतिथिसहस्रमप्यर्धरात्रेऽपि ।।

१५. श्रुत्वाऽभ्येति सुदूरेऽपि चायान्तं तीर्थवासिनम् ।
एत्य प्रणम्य पदयोरानयत्यात्ममन्दिरम् ।।

१६. आनीय भक्तिभरितो ददात्यातिथ्यमुत्तमम् ।
दत्वा चेष्टान्नसन्तृप्तमासीनमुपगच्छति ।।

१७. गत्वा च भूगतोदन्वत्सिन्धुकान्तारपर्वतान् ।
तीर्थमाहात्म्यजिज्ञासातुरः पृच्छति सादरम् ।।

१८. पृष्ट्वा च दूरमामृश्य यियासाकुलमानसः ।
नित्याग्निहोत्री साऽऽकाङ्क्षां श्वासैर्व्यक्तीकरोति च ।।

१९. एवं विधमभ्यागतसेवापरतन्त्रमानसे विप्रे ।
गमयति दिवसान् दिवसे कस्मिंश्चिद्भास्करेऽम्बरार्धगते ।।

२०. शार्दूलचर्मणा कृतमौलिकर्मणा
पिहितजटीभूतकैश्यकेन

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केदारकङ्कणाङ्कितपाणिना धृत-
कक्षपालायोगदण्डकेन
ऐणेयमेखलायोगातिसङ्कुच-
न्नैजसंक्षुल्लकमध्यमेन
आरकूटमरीचिभासुराङ्गकलिप्त-
घनसारपाण्डुरभस्मना च
योगपट्टेन पृथुवत्सभासुरेण
चलितरुद्राक्षकुण्डलश्रुतियुगेन
करकमण्डलुना रक्तकञ्चुकेन
तद्गृहं प्रति कश्चिदागच्छति स्म ।।

२१. आयान्तमेनं परमं यतीन्द्र-
मभ्येत्य भक्तचा प्रणिपत्य गेही ।
अर्घ्यादिदानेन समर्च्य तुष्टं
चकार मृष्टान्ननिवेदनेन ।।

२२. भुक्त्वा कटे कुशमये च मुहूर्तकालं
विश्रान्तिसौख्यमनुभूय गृहस्थचर्याम् ।
अध्यापनं वटुजनस्य समाकलय्य
सम्मोदतुन्दिलमनास्स मुनिर्बभूव ।।

२३. तृप्तं तमेत्य सविधावुपविश्य गेही
पृष्टो निवेद्य कुशलं पुनराबभाषे ।
"स्वामिन् ! पवित्रमिदमद्य मदीयगेहं
मान्योऽभवञ्च भवदीयसमागमेन ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२४. कस्मादेशादिहाऽगच्छत्पूतं कर्तुममुं जनम् ।
कं देशं पावनं कर्तुं यियासति भवानितः ।।

२५. युष्मद्वाचो मन्त्राः स हि प्रयागस्त्वया तु योऽध्युषितः ।
त्वत्पादजलान्यलघुद्योमार्गझराम्बुपौनरूक्तानि ।।

२६. यदीयभवनान्तरं सततमेत्य मज्जन्ति स-
ञ्जपन्ति च भवादृशास्सममदन्ति मृष्टौदनम् ।
लसन्ति सुहिता भवन्त्यपि स एव धन्यः पुमान्
स एव सुकृती कृती स हि फली स वै जीवति ।।

२७. मौनिनाथ ! कुटुम्बजम्बालपटल-
मग्नमादृशगृहमेधिमण्डलानि ।
त्रातुमौषधमन्यत्किमेकमस्ति
युष्मदङ्घ्रिरजोलेशमन्तरेण" ।

२८. इति वदति गृहस्थे सोऽवदत्पारिकाङ्क्षी
विकसितवदनाब्जो "वत्स ! युष्मादृशानाम् ।
ललितसुखदवृत्त्या गेहिनां मादृशानां
भवति हि चरितार्थस्तीर्थसेवाभिलाषः ।।

२९. पार्श्वगोश्रेणीस्थमधुकोशको गृही
पाणिस्थिता धनभस्त्रिका च
फलितनिष्कुटरूढकल्पमहीरुहो
गोष्ठसन्दानिता कामगौश्च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अक्षीणनिर्मलामृतपूर्णदीर्घिका
सन्निकृष्टसुवर्णपर्वतश्च
मरुदेशपथमध्यपानीयशालिका
लभ्यं फलञ्चाशनायितस्य
बधिरपङ्गवन्धभिक्षुकब्रह्मचारि-
जटिपरिव्राजकातिथिप्रभृतिकस्य
तीर्थयात्रारतस्य बुभुक्षितस्य
तेन गृहमेधिना समो नास्ति विप्र !" ॥

३०. इति मुनौ निगदति ।

३१. श्रुत्वा प्रवरोऽवादीत् "देव ! भवानटति सर्वतीर्थानि ।
वसुधायां तस्मादहमनुयुञ्जे त्वां विविच्य शुश्रूषुः ॥

३२. उषितं कस्मिन् देशे ? त्वयाऽधिरूढाश्च पर्वताः के वा ? ।
द्वीपाः के वा दृष्टा ? नदीषु पुण्यासु कासु वा स्नातम् ? ॥

३३. अटितं केषु वनेषु च ? विलोकितास्सागराः के वा ? ।
तत्र भवांस्तत्रभवान्विस्मयजनकान् ब्रवीतु मां विषयान् ॥

३४. तीर्थाटनासमर्थोऽपि श्रुत्वा मुच्येत किल्बिषैः ।
तन्माहात्म्य" मिति पृष्ट आदरान्मुनिरब्रवीत् ॥

३५. "हे चतुराननान्वयसुधार्णवपूर्णविधो ! विलोकिताः
पुण्यनदीनदा जनपदा बहुतीर्थदिदृक्षया मया ।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आसलयाद्रिपश्चिममहीध्रहिमाचलपूर्वपर्वता-
ल्लोचनगोचरीकृतमभूद्बहु तत्र च तत्र चाद्भुतम् ॥

३६. अभजं केदारनाथं विनमितशिरसा हिङ्गुलापादपद्मे
अनमं भक्तया प्रयागस्थलनिलयसरोजाक्षमद्राक्षमारात् ।
कलशार्णोराशिकन्यापतिमपि बदरीनाथमैक्षे च शेषा-
चलभूषां वेङ्कटेशं स्तुतिकुसुमशतैरार्चिषं विप्रमौले ! ॥

३७. बहुभिर्वचनैः किं वा निखिलदिशावलयमध्यभूभागे ।
तन्नास्ति किञ्चिदपि यन्मम लोचनमार्गतः स्खलितम् ॥

३८. तदेवमस्तु गृहस्थप्रशस्त ! लम्बमानरविरथतुरङ्गशृङ्गार-
चारुचामरच्छटाप्रेक्षणक्षणोद्ग्रीवचमरविसर उदयधरा-
धरे वर्तमानानशेषविशेषान् शेषाहिरपि नालं भाषितुम् ।
अन्धकरिपुकन्धरावासवासुकिवियोगभवदुर्व्यथादोदूयमान-
भोटिनीभोगभागपरिवेष्टितपटीरविटपिवाटिकावेल्लदेला-
लतावलयमलयनिलयस्य किमस्ति मूल्यं शैत्यस्य ?
अ ह ह ! विकटकूटकोटिविटङ्कशृङ्गाटकाढौकमानशर-
दिन्दुबिम्बगलदमृतबिन्दुदुर्दिनार्द्रीकृतसल्लकीपल्लवप्रभ-
ञ्जनपराञ्जनहस्तिहस्ते चास्ताचले मणिप्रस्तरेष्वनु-
भूता विश्रान्तिः स्मृताऽद्यापि पुलकयति तनुम् । स्वस्वप्रव-
र्धितवर्धिष्णुधरणीरुहसन्दोहदोहदप्रधानासमानखेलदैल-
बिलविलासिनीविलासवाचालतुलाकोटिकलकलाहूय-
मानसमदालसमरालविराजितेषु राजताचलसानुषु हाला-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हलाहारविहारस्थलेषु नयनविषयीकृतेष्ववश्यं नश्यन्ति संसृतिक्लेशाः । सततमदजलस्रवणपरायणैरावणविषाणकोटिसमुट्टङ्कितकटकपरिस्फुरत्कुरुविन्दकन्दलव्रातजातालातशङ्काऽपसर्पदभ्रमुविभ्रमधुरन्धरस्य मेरुधराधरस्य शिखरसौन्दर्यस्य विलोकनं कथं भवति बहुजन्मकृतसुकृतपरिपाकमन्तरा ? एवम्भूतानि परमाद्भुतानीश्वरानुग्रहेणाऽकलयं कालेनाल्पेनें" ति । तस्य च वचनमाकलय्य ।

३९. ईषदङ्कुरितहासमरीचि-
ग्रस्तकोमलकपोलतलोऽसौ ।
कौतुकोत्पुलकिताखिलकायः
सञ्जगाद यमिनं गृहमेधी ॥

४०. "विना शङ्कां कुर्वे यतितिलक ! विज्ञापनमिदं
सपक्षो वा नेष्टे कलयितुमिदं वत्सरशतम् ।
वयो नूत्नं नूनं ललितवदनं वक्ति भवतो
महत्त्वं ते वेत्तुं प्रभवति भवानेव न वयम्" ॥

४१. इति तस्य वचः श्रुत्वा प्रोवाच मुनिपुङ्गवः ।
"को दोषोऽज्ञातसम्प्रश्ने शृणु वक्ष्यामि भूसुर ! ॥

४२. यस्माद्धि योगसंसिद्धा वयं सिद्धा इतीरिताः ।
रुजा वाऽपि जरा वाऽपि नाऽस्मानास्कन्दितुं क्षमा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४३. परमं गोप्यमिदं तथापि न च ते गूहाम्यहं वच्मि भू-
सुरमौलेऽस्ति महौषधी रसवरो देवानुकम्पोद्भवः ।
प्रथितो यः किल पादलेप इति तद्भू रिप्रभावादहं
विचरामि त्वरया समीरतरसोऽहङ्कारमुन्मूलयन् ।।

४४. धावन्ति हि यावद्दिवि हरिदश्वतुरङ्गमा निरायासम् ।
यामो वयमपि तावत्पटुना चटुलेन धरणिगमनेन ।।

४५. इत्युक्ते मुनितल्लजे द्विजवरो भक्त्या निबद्धाञ्जलिः
प्रावोचत्कुतुकातिरेकभरितः "त्वत्प्राभवाज्ञानतः ।
मन्दोऽहं यदवादिषं वच इदं सोढ्वा मुनिग्रामणिन् !
त्वच्छात्रं दयया कृतार्थय नदीक्षेत्राद्रिसन्दर्शनैः ।।

४६. इत्यर्थयते तस्मै रसलिङ्गनिधानवेत्रसम्पुटके ।
दान्तभरण्यां निहितं किञ्चद्रसमर्पयन् जगाद मुनिः ।।

४७. "दिव्यममुं रसराजं पदयोरालिप्य मुकुलिताक्षो यम् ।
देशं ध्यायति मनसाऽवतरति तरसा स तत्र सह मनसा" ।।

४८. इत्युक्त्वा चामन्त्र्य च यतिकुलनाथे यथायथं याते ।
प्रवरः प्रगे परे द्यवि पदयुगले तं लिलेप रसराजम् ।।

४९. कुतुकतरङ्गितहृदयो जगाम विप्रो हिमालयं तूर्णम् ।
श्यामलकोमलकाननहेमाढ्यदरीझरीनिरीक्षायै ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५०. तदनु ददर्श भूसुरवरोऽम्बरचुम्बिशिरस्सरज्झरी-
पटलमुहुर्मुहुर्लुठदभङ्गतरङ्गमृदङ्गनिस्वनम् ।
तदनु नटन्मनोज्ञपरिफुल्लकलापकलापिसञ्चयं
कटकचरत्करेणुकरकम्पितसालकुलं हिमाचलम् ।।

५१. दृष्ट्वा हर्षोत्कर्षतरङ्गितान्तरङ्गः ।

५२. नरनारायणचरणद्वयपावनचिह्नचिह्निते सुपथि ।
बदरीतरुमण्डले चरन् धरणीनिर्जरवल्लभः पुरस्तात् ।।

५३. उल्ललदलकाजलकणपल्लवितकदम्बगन्धिले वहति ।
पङ्कजमधुमदबम्भरझङ्कारविसारके मरुत्पोते ।।

५४. दन्तच्छयाप्रवाहे प्रसरति पुरतः पाटलेभ्यो मृदुभ्यः
शुण्डादण्डानुदस्योन्नमति करिघटासल्लकीपल्लवेभ्यः ।
दंशीव्राते समुह्य स्वनति सरुधिरे सृक्वणः प्रान्तभागे
कुञ्जान्तः पुण्डरीका मुकुलितनयनं शेरते गुर्गुरन्तः ।।

५५. उत्खनन्ति कुरुविन्दसमूहं
सैकतेषु सारितां किटिसङ्घाः ।
साचिदीर्घमपि वत्ससदृक्षा
ऋश्यका अभिपतन्ति निकुञ्जात् ।।

५६. प्रबलभल्लुकनखभल्लभयदमथन-
शिथिलमधुकोशमक्षिका अन्तरेण ।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निपतितातपकान्तिभिर्भाभवीति
वसुमती तिलतण्डुलमिश्रणमिव ।।

५७. एतानि तान्यपश्यत्
व्याकोचत्कौतुकेन स प्रवरः ।
गिरिकटकतटनिरन्तर-
तरुगहनगुहाविहारनिरतमनाः ।।

५८. जटति दीर्घशिरोजपाशेऽत्र सगरस्य
नप्ता तपश्चर्कराञ्चकार
दर्शयन्ती जरत्कमठकर्परमत्र
नाकापगा जगत्यवततार
अद्रीन्द्रकन्या विधूय त्रपामत्र
पतिसेवनायासमनुबभूव
फालाक्षनयनाग्निकीलावृतो हन्त !
भस्मीबभूव सूनाशुगोऽत्र
मदनतापेन विव्यथे पावकोऽत्र
तापसकलत्रसौन्दर्यदर्शनेन
शरवणमसूत देवसेनान्यमत्र
नन्विति ददर्श भूसुरः कौतुकेन ।।

५९. भस्मीभूता धरित्री लयसमयशिखाज्वालिकामालिकाभिः
सौभाग्यं नष्टपूर्वं पुनरपि ललितं चाग्रहीष्यत् कथं वा ।
कल्पे कल्पे तुषाराचलभवजडतामन्तराऽरोहयिष्यत्
सस्यादीनप्यवेत्स्यत् निजतनुमथवा ? तं नगेन्द्रं नमामि ।।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६०. भूताधिपोऽनेन पीताहियज्ञोप-
वीताञ्चितो गृही सम्बभूव
प्लवनमभ्यासयन्निन्द्रश्चीं गाङ्ग-
सलिलकेलीसौख्यमनुबभूव
काले स्रुता पीनभूसुव्रतौषधी
रखिलभूमीधराणां दुदोह
रत्नभूषोज्ज्वला मेनाऽभिमानेन
निर्जरीसमुदये सञ्चचार
जनितरसनाविरसतानिरासनाय
विविधसवनेषु विप्रवौषट्कृतानि
अमृतपायिसमूहा उपायनानि
जानतेऽनेन भूमिभृत्तल्लजेन ।।

६१. चतुरास्येनाऽपि किं स्यान्निगदितुमचलस्यास्य माहात्म्यमस्मिन
अवलोकिष्ये पुनः श्वोऽभ्दुततमविषयानद्य गच्छामि तावत् ।
ननु मध्याह्नं पतद्भिस्तुहिनकणचयैश्चूत्क्रियाबावदूका
रविकान्ताश्चित्रभानोः खरतरकिरणैस्तापिता वेदयन्ति ।।

६२. एवमभ्दुततुषारगिरीन्द्रे
ब्राह्मणे चरति दर्शनोत्सुके ।
तत्तुषारसलिले पदलेपोऽ
दुद्रुवन्न हि विवेद तदेषः ।।

६३. यावद्गन्तुमना विप्रो मीलिताक्षोऽस्मरत्पुरीम् ।
तस्थौ तत्रैव नोद्गच्छन् कः कुर्याद्विधिमन्यथा ।।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६४. एवं लेपनहीनपादयुगलः स्वग्रामयानत्वरो-
द्रेकोद्विग्नमना मनागपि पदद्वन्द्वे न चोद्गच्छति ।
यावत्तावदयं विवेद बहुधा चुक्रोश "हा दुर्विधे !
घोरापारतुषारदावमनयो मां तापसव्याजतः ।।

६५. कुत्रारुणास्पदपुरी ? कुत्र हिमाद्रिः ? कुतः क्वचाऽगच्छम् ?।
इदमेतदिति न जाने वत्ति च को वाऽत्र निर्गमनमार्गम् ।।

६६. विज्ञातु पदलेपसत्त्वमगमं मायामवन्तीं गयां
काशीं द्वारवतीं न नै व च कुरुक्षेत्रं प्रयागन्नु वा ।
दृप्य द्गण्डक पुण्डरीकमहिषं नीहारशैलं कुतो
वाऽयां? केवल बुध्दिजाड्यजनितोन्मादाः किल श्रोत्रियाः! ।।

६७. क्षणं योऽपश्यन्मां पुरमखिलमन्विष्यति किय-
त्पिता मे सन्तापं व्रजति मयि दूनेऽत्र गहने ? ।
दिनान्ते प्रस्थानं मम निवसनाद्या न सहते
बहिस्सा मे माता कियदिति च दूयेत चकिता ? ।।

६८. मम भवनेन्दिरा मम मनोऽनुगुणाचरणे परायणा
मम कुलपालिका मधुरमञ्जुलसल्लपने विशारदा ।
मम सहधर्मनिर्वहणधूर्वहने धृतकङ्कणा सती
मम सरणौ कथं न भविता विनिबध्दविलोललोचना ।।

६९. कालेनैतावता च्छात्राः परोक्षे मयि चाप्नुयुः ।
शोकं महान्तमश्रान्तमभितो मां चरिष्णवः ।।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७०. कथमतिथिजनानामर्चना निर्वृता स्या-
त्कथमिव हुतभुग्वाऽऽराधितः स्यात्प्रणीतः ? ।
अहमिह ननु नित्यैः कर्मभिर्वञ्चितो हा
विधिहतक ! दिगन्ते निर्दयं पातितोऽस्मि ।।

७१. को वा सुकृती मां गृहगमनाय वदेदुपायमिह गहने" ? ।
इति निरवधिचिन्ताम्बुधिपतितश्चरति स्म काननं परितः ।।

७२. श्रीकुण्टिमद्दिपुटभेदनशेषशर्मा
श्रीपेद्दनार्यमनुसम्भवनाम काव्यम् ।
प्रोवाच संस्कृतगिरा प्रथमो हि तस्मिन्
सर्गो हिमाचलविलोकननामकोऽयम् ।।

इति श्रीकुण्टिमद्दि श्रीनिवासाचार्यस्य पण्डितप्रकाण्डस्य
पौत्रेण रङ्गाचार्यस्य पुत्रेण शेषशर्मणा विरचिते संस्कृत
मनुसम्भवमहाकाव्ये हिमाचलालोकनो नाम
प्रथमः सर्गः ।

———

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुसम्भवः

द्वितीयः सर्गः

१. मध्ये तटानां कुलिशाहनामाकूटमामूलमिवारुणानाम् ।
मन्दाकिनीनिर्झरभङ्गसङ्गात् शीतेषु नित्यं सिकतातलेषु ।।

२. अभ्रङ्कषाणां वटनारिकेलपुन्नागरम्भाक्रमुकादिकानाम् ।
सूर्यातपत्रस्ततमिस्ररक्षाधुरन्धराणामवनीरुहाणाम् ।।

३. वाटीषु रम्यं पिककेकिकीरभृङ्गीनिनादैर्मुखरीकृताभिः ।
दरीभिरिन्दूपलमञ्जुलाभिर्गन्धर्वगानै रवणञ्च साम्म् ।।

४. दृष्ट्वा मुनीनामयमाश्रमः स्यात्
ज्ञास्यामि गत्वा गमनाय मार्गम् ।
इत्याशया सम्भ्रमतस्स विप्रः
कृशीभवन्मानससाध्वसस्सन् ।।

५. निकटमहीधराग्रतटनिर्गतनिर्झरपातमुत्सृजन्
सकुटिलवेणिकामनुसरन् धरणीसुर उत्तरङ्गयन् ।
कुसुमितवल्लरीसमवलम्बनचञ्चलषट्पदारवान्
कटकतले पुनर्मणिमयेन पथाऽवततार चाग्रतः ।।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६. तीरे सौगन्ध्यपाणिन्धमदरविदलच्चारुसौगन्धिकानां
केदाराणां रसालक्रमुककुरवकस्फारकान्तारमध्ये ।
चन्द्राश्मोल्लोचरम्यं जटिलमधुरसागुच्छमत्तालिमाला-
मल्लीवल्लीमनोज्ञं मरकतखचितं हर्म्यमेकं लुलोके ।।

७. दृष्ट्वा तदीयचित्रोदञ्चितसौभाग्यविस्मितमनस्के ।
ब्रह्मान्ववायतिलके किञ्चित्तद्भवनसविधमुपयाति ।।

८. मृगमदसौरभविभवद्विगुणितघनसारवीटिकागन्धैः ।
स्थगयन्नितरपरिमलं ववौ मरुत्कोऽपि कामिनीपिशुनः ।।

९. एतद्रातपरम्परापरिमलैर्जानन् जनैरन्वितं
तं देशं निकटीभवन् स तरुणीं विद्युल्लताविग्रहाम् ।
पद्माक्षीमलिकुन्तलां विधुमुखीं बिम्बाधरां सुस्तनीं
कामप्यैक्षत निम्ननाभिमसरीं शातोदरीं सुन्दरीम् ।।

१०. अमलमणिमयनिजमन्दिराङ्गणस्थ-
तरुणसहकारवेदिकास्था सुखेन ।
शीतलानिलसंसेव्यमाननाक-
फुल्लसरसीजलोचना तत्र साऽपि ।।

११. ततनितम्बाभोगपाण्डुरप्रावारदृश्यान्तरीयकषायकान्ति-
शोणीकृतसुधांशुमणिपीठके कुचकुम्भनिलीनतुम्बीफलञ्च
कर्णपर्वीभूततरुणाङ्गुलीधूततन्त्रीनिनादसङ्गीतकञ्च
रतिवश्यतापिशुनालापसामिनिमीलितालसनेत्रयुग्मकञ्च

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निपुणवादित्रगीतप्रबन्धताल–
मानसम्पादनानुकूलक्रमेण
कम्रकरकञ्जरत्नकङ्कणरवेण
मञ्जु संवीणयन्ती च तं ददर्श ।।

१२ आश्चर्येण विलोचने विकसिते तारामयूखोर्मिभिः
प्रोद्यद्भिर्विकचासितोत्पलचयाः कीर्णास्समन्तादपि ।
पीनोत्सूनकुचद्वयं पुलकितं वाञ्छास्तरङ्गायिता–
स्तस्या दृष्टिपथं गते रतिपतेस्तुल्ये धरित्रीसुरे ।।

१३ आलोक्यैव च रारटत्पदतुलाकोटिद्वयं सा रया–
दुत्थाय प्रचलत्कुचं प्रविचलन्मध्यं विलोलत्कचम् ।
फुल्लैकक्रमुकप्रकाण्डनिकटं गत्वाऽतनोत्तत्पथं
लोलापाङ्गमरीचिभिर्नवसुधाधारापरीवाहितम् ।।

१४ शङ्कालोलं वितेनेऽतनुत च कुतुकं विस्तृतं लालसत्वं
चक्रे पारिप्लवं तन्नयनयुगमधः पक्ष्मले चालिते च ।
शंसाभिर्निष्क्रयाभ्यां सविधनिवसनात्तस्य सम्फुल्लनेत्रा–
म्भोजाभ्यां लीलया सा प्रवरमथ नमच्चन्द्रिकाभ्यामपश्यत् ।।

१५ अङ्गेष्वरोहन् पुलका द्विजेन्द्रं
विलोकयन्त्यास्सुरपङ्कजाक्ष्याः ।
चित्ते पदं न्यस्तवतः स्मराग्ने–
र्धूमप्ररोहा बहिरुद्गता वा ।।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१६ "नेत्रद्वन्द्वमिदं मुखेन्दुममभितो व्याप्नोति किं पक्ष्मले
दूरं न्यस्य च पातुके" इति धियाऽनङ्गोऽलिखत्तन्मितिम् ।
इत्येवं तिलकायितो मृगमदः स्वेदोदबिन्दुद्रुतः
सस्यन्दे क्रमशो ललाटफलकात्तस्याः कपोलद्वये ।।

१७ अनिमेषत्वं व्युदास्यत्तरलितनयनं नूत्नघर्मप्ररोहा
अनिदाघत्वं व्यलुम्पन् मतिगतिमलुनान्मोहविभ्रान्तिभावः ।
मनुजध्यानेन तस्या वपुषि मनुजता प्रादुरासीद्दिवौको–
ललनायाः षट्पदस्य स्मरणमिव सदा कीटकस्येव तत्त्वम् ।।

१८ एवं तद्रूपरेखाविलासविवशा सा कमलपत्रेक्षणा
आत्मन्येवमचिन्तयत् ।

१९ कुत्रत्यो मदनं मधुं धनपतेस्सूनुं जयन्तं विधुं
वाऽलं जेतुमयं विलासविभवैर्विप्रान्ववायः क्व वा ।
एतन्मूर्तिमनोज्ञता क्व यदि मां गृह्णाति भूमीसुरो
दासेयं करवाणि फुल्लसुमनः कोदण्डकाण्डं स्मरम् ।।

२० वदनेन्दुसौन्दर्यहिमजलसञ्जातसारसे किन्नु विलोचनेऽस्य
पीनाविमौ श्रुतिस्पर्धयेवोन्नम्य जृम्भितावंसौ च नूनमस्य
सङ्कल्पसम्भवास्थानपीठीसदृग्विस्तृतं दृश्यते हृदयमस्य
स्पर्धायमानेषु पल्लवेष्विव मृदु शोणायते पदद्वितयमस्य

शाणगलितार्कपांशुभिर्नवसुधार्द्र–
मृदितजाम्बूनदीमृदा किं ससर्ज

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अब्जयोनिरमुं ? न चेन्नाभविष्य–
दतुलसुषमाऽस्य सुकुमारविग्रहस्य ।।

२१ दृष्टा नरसुरखेचरकिन्नरगरुडोरगास्सदा तरुणाः ।
अपि चारणविद्याधरगन्धर्वास्ते समास्समेऽस्य किमु ? ।।

२२ इति सञ्चिन्त्य च मीनकेतनधनुर्ज्यामुक्तनाराचदु–
र्दिनसम्मूर्छितचित्तजीवनरुहा चक्लाम सा सत्वरम् ।
विजहौ च ह्रियमङ्ग्रहंसकयुगे शब्दायमाने पुर–
स्तिर आतिष्ठदिमामुपेत्य स वधूमूचेऽमरीं सम्भ्रमात् ।।

२३ का त्वं ? भीतमृगाक्षि ! हन्त ! विचरस्येका विशङ्कं वने
विप्रोऽहं प्रवराभिधो नगमिमं गर्वादयां भामिनि ! ।
भ्रष्टाध्वा गहने पुरं कथमहं यास्यामि का वा गतिः ?
मार्गं वेदय हे दयावति ! भवेत्ते भव्यमव्याहतम् ।।

२५ इति विवृण्वति नैजकथां द्विजे
ज्वलितलोचनयुग्ममरीचि सा ।
चलितमध्यकुचद्वयकुण्डलं
दरविकस्वरसृक्व जगाद तम् ।।

२५ आकर्णान्तविशाललोचनयुगे सत्यप्यहो विप्र ! कां
मार्गं पृच्छसि ? किं त्वया न विदितो येनाऽगमो यौवतम् ।
व्याजेनालपितुं मिथः स्थितमिदं धैर्यं कियत्तावकं ?
किं तावल्लघवो वयं तव दृशोः ? किं जल्पितैर्नैककैः ? ।।

२६ एवं सनर्मगर्भमुक्त्वा सा भूयोऽपि जगाद भूमीसुरम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२७ बालेन्दुमनु सुधाब्धौ जातसुन्दररी
सोदरी मामिका सुन्दराङ्ग !
यन्त्रगात्रैरश्मविद्रावणी गानविद्या हि नः कला सारसाक्ष !
बाल्यादि सूनास्त्रशास्त्रसूत्रावृत्तिरेव नः कृत्यं हि राजवदन !
हयमेधराजसूयादीनि सवनानि
शुल्कानि नो हि विशालहृदय !
कनकभूधरकल्पपादपतलेषु
मारकतवेदिका निषद्या च नो हि
ब्रह्मवैकुण्ठशिति कण्ठपृथुसदांसि
नो हि खुरलीस्थलानि गोत्रामरेन्द्र ! ॥

२८ विप्रवराऽहं नाम्ना वरूथिनी मे तिलोत्तमा हरिणी ।
रम्भा शशिरेखाद्या गुणगणगण्या अनुत्तमास्सख्यः ॥

२९ बहुरत्नद्युतिमेदुरोदरदरीभागप्रभाभासुरे
विचरामो सिहिकाचलेऽत्र सततं मन्दाकिनीशीकरैः ।
ललिताश्शीतलमन्दमारुतचलद्वल्लीप्रसूनासव–
ग्रहणेन्दिन्दिरनादतुन्दिलवनानीका अमी मामकाः ॥

३० चामीकरसच्छायं क्लान्तं मध्याह्नतपनतापेन ।
तावकशरीरमेतत्तादृशमेतादृशीभूतम् ॥

३१ विश्रम्यास्मिन् किंचित्पुनीहि मामपि निशान्तमेतदपि ।
इति ललितमुग्धमधुरं प्रवदन्तीं तां जगाद भूदेवः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३२ सम्पन्ना ननु राजहंसगमने ! सर्वा सपर्याऽप्यहं
तृप्तोऽस्म्यत्र न साम्प्रतं चिरयितुं गम्या पुरी त्वद्गृहम् ।
एत्यैकं परमन्यथा किमु ? समस्तातिथ्यचर्याविधा-
वेका भक्तिरलं दयां कुरु मया गन्तव्यमेवाञ्जसा ।।

३३ को वोपायो निलयगमनायाधुना मे ? महीय-
स्त्वन्माहात्म्यं मनसि सुभगे ! चिन्तितं चेदसाध्यम् ।
नो किञ्चिद्वो घटय जननीमस्मदीयांश्च माञ्चे"-
त्युक्तं तं सा धवलनयनाऽवक् दरस्मेरवक्त्रा ।।

३४ किं पुः ? त्वं गृहमव्यवस्थितपदं 'यामी' ति वावद्यसे
किं तुल्या भवतां कुटीरनिलयैर्नैते मणीकन्दराः ।
एते नन्दनचन्दनाश्च लवली मल्लीनिकुञ्जा अमी
गङ्गातुङ्गतरङ्गशीतसिकतारम्या अमू भूमयः ? ।।

३५ किं भावस्य निगूहनेन धरणीलेखर्षभेतः परं ?
मच्चेतस्त्वयि गाढसङ्गतमभूत्कुर्याः प्रसूनास्त्रसात् ।
किं वा मां मकरन्दमत्तमधुपश्रेणीरवैश्शब्दने
गाढक्रोडनियन्त्रणेन सुखयेः कुञ्जे प्रसूनाञ्चिते ।।

३६ इत्युक्तां तां प्रवरोऽवादी "दित्थं न वक्तुमुचितं ते ।
कामयितुं किं स्थाने नियमैर्नयतो दिनानि विप्रान्नः ? ।।

३७ होमो नास्ति न देवतार्चनमुताहो नो सपर्याऽतिथे-
र्व्युत्क्रान्तो निघसस्य चापि समयो वृध्दौ क्षुधाविक्लबौ ।

-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्मार्गार्पितलोचनौ च पितरौ स्यातां पुनर्वैदिका
नश्येयुर्विधयोऽद्य गेहमगते नित्याग्निहोत्रे मयि" ॥

३८ इत्थं तस्मिन् वदति वदने जातवैवर्ण्यलेशाऽ
वादीदस्मिन् वयसि ललिते निर्गते श्रौतकृत्यैः ॥
को वा भोगानुभवसमयोऽनङ्गमूर्ते ! वदास्म-
द्गाढाश्लेषप्रणयसफलाः किं न यज्ञास्समस्ताः ? ॥

३९ सद्योद्भिन्नकुरङ्गनाभिमुकुलान्नीता च कस्तूरिका
भास्वद्भानुविलीन एष विमलो निर्हारि सङ्कन्दवः ।
सन्त्येषा हिमवालुकाऽत्र गलिता सप्तच्छदेभ्यः स्वयं
फेनाच्छं च सुमस्रुतं विधुशिलाद्रोणीतुषारोदकम् ॥

४० दिविजतरुवितीर्णान्यंशुकान्यासवानि
स्फुटकुसुमसमूहास्सन्ति सौवर्णभूपाः ।
अवनिसुर ! रिरंसुस्सन् मया साकमेता-
न्यनुभव सुखयैनैरन्वहं त्वाञ्च माञ्च ॥

४१ चन्द्रिकयाऽन्धस्य फलं किं ? घूको भीत आतपात्कोणे ।
लीन इव हन्त ! संसृतिकूपे पिपतिषसि निर्जरीं मुञ्चन् ॥

४२ लभ्यः स्यात्कतिभिर्भवैस्सुमधनुः काण्डप्रकाण्डव्यथा-
दूनाया नवनीतवत्परिपतद्वातैर्द्रवन्त्या मुहुः ।
हस्तन्यस्तकपोलमाकुलकचं चोद्वान्तदैन्येक्षणं
पश्यन्त्याः पदवीं प्रियस्य निबिडाश्लेषोपभोगोत्सवः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४३ क्षुत्पीडाव्रतनियमैरिन्द्रियदमनाच्छरीरशोषाच्च ।
किन्नु भवेत्सुखमयि ? सन्निहिते सशरीरनाकसुखे ॥

४४ इति वदन्तीं प्रवर एवं जगाद ।

४५ साम्प्रतमेतत्सर्वं कामयितुर्यत्त्वमात्थ किं तेन ? ।
अनभीकस्य तु सुभगे ! वद चेज्जानासि वर्त्म भव पुण्या ॥

४६ इन्द्रियपरवान्विप्रो मदनकुटिलविषमबाणपरतन्त्रः ।
नश्यति च भ्रश्यति च ब्रह्मानन्दाधिराज्यपदवीतः ॥

४७ इति वदति तस्मिन्नवनीसुरे तत्परुषभाषणश्रवणचकिता सा वृन्दारकसुन्दरी विषमाशुगेन पुङ्खानुपुङ्खप्रसारितविकचारविन्दकलम्बकदम्बविशीर्यमाणसन्धिबन्धा , अतिमात्रोद्रिक्ता, परिणतविविधविबुधतरुजनितमधुरमधुरसपानमदविजृम्भणेन नखच्छेदनेनापि वेदनामजानन्ती, कन्दर्पदर्पहरमपि खण्डपरशुं चातुर्येण जिगीषुणा नवयौवनमदेन, अनन्यकन्यासामान्यलावण्यरेखामदेन च, "एकान्ते नयनानन्दसन्धायकस्य, अनभिज्ञकुटिलमार्गस्य,चेलाञ्चलनिष्कवदुपस्थितस्य तस्य चावनीसुरस्य तारुण्येन मौग्ध्येन च स्ववैदग्ध्यं विराजत" इति पल्लवितमानसोल्लासमदेन चापि चञ्चलदृगञ्चलशिलीमुखपटलस्य तन्मुखाम्भोजमचञ्चलशरव्यं कृत्वा वलयमणिगणच्छायाकलापे वियति प्रसरति शिथिलधम्मिल्लमपनिबध्नन्ती, तरुणचक्राङ्गप्रस्पर्धिपीनस्तन-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वन्द्वविद्रुतकुङ्कुमरसपङ्किलतारहारमुक्तामणीः नखाग्रेणामृश्य संस्कुर्वाणा, पतितनवतरुकुसुमकेसरविधूननमिषेणोत्तरासङ्गं विधूय मुहुरंसे निवेशयन्ती, नातिदूरविचलच्चेटिका भ्रूभङ्गमात्रेण तत्रैव नियमयन्ती, निवारयन्ती च पुनः पुनः प्रसारितरूक्षेक्षणेन तासां पुरश्चलनं, तमुपेत्यैवमालपति स्म ।

४८ चित्तं यत्र विकासमेति च रसादेकाग्रतो निर्वृतिं
यत्राप्नोति च कुम्भदीपकलिकातुल्यं हृषीकाणि च ।
सौख्यं यन्त्यचलानि यत्र च रसो नूनं परब्रह्म; साऽऽ
नन्दो ब्रह्म किलेति वेदवचनं किञ्चित्त्वयाऽऽलोच्यताम् ।।

४९ एवं प्रबोधयन्तीं निर्जरललनां ससम्भ्रमं वीक्ष्य ।
सव्रीडस्सजुगुप्सो विहस्य विरसं मनागिदमवोचत् ।।

५० त्वत्पाण्डित्यमहो विलोकितमिदं न क्वापि कामागमाऽऽ
चार्ये वात्थ च साधु साधु दुरितं किं ते त्रयीचोदितः ।
आचारो ? रतिरेव पुण्यमयि ! किं तर्कैः ? किलार्था अमी
मोक्षश्रीपदवेदमन्त्रफणितेस्त्वत्सम्प्रदायागताः ।।

५१ प्रातस्सायं हविर्भिस्सविधि हुतवहस्तर्पितस्सानुकम्पं
दद्याद्यत्तद्धि सौख्यं दिविजतरुणि ! किं कल्पसे वावगन्तुम् ।
अग्निर्दर्भा यथा मेऽरणिरपि न तथा प्रीतयेऽन्यत् शरीरं
किं नित्यं ? तुच्छसौख्यान्ययि ! वद न पुनः श्मश्रुणि-
भ्रामराणि ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५२ इत्युक्ते सा तु जोषं विदलितहृदया जातवैवर्ण्यवक्त्रा
ताम्यन्ती साश्रुनेत्राऽनिमिषितनयनं विप्रमालोकयन्ती ।
मूर्धानं कम्पयन्ती दरमथ वचसा गद्गदेनैवमूचे
"कान्ता रन्तुं स्वयं चेदभिसरति भवेद्भ्राजनं लाघवस्य ।।

५३ व्यात्सीर्मेतःपरं मा' मिति सुरवनिता प्रच्यवन्नीवि वेगा
दुद्यन्निःश्वासभङ्गं विगलितकुसुमं विश्लथत्केशबन्धम् ।
रोमाञ्चद्गात्रवल्लीकमनुनयवचोदीनवक्त्रारविन्दं
धात्रीदेवं रिरंसाकबलितहृदया स्वैरमभ्येत्य बाढम् ।।

५४ गाढालिङ्गनभुग्नपीवरकुचौन्नत्यं समाश्लिष्य तं
यावद्दन्तपटं चुचुम्बिषति सा तां 'कृष्ण कृष्णे' ति सः ।
अंसन्यस्तकरं निरास विमुखो 'याही' ति विप्रः स्थित-
प्रज्ञान्नैव हि चालयन्ति तरुणीमायाविलासा मनाक् ।।

५५ एवं तेन निरस्ता लज्जाविवशा नियम्य कबरीं सा ।
प्रकटितगात्रं शोणापाङ्गं दृष्ट्वा सहिक्कमवदत्तम् ।।

५६ "पातं किन्नु सहेयुरेवमबलाः ? क्रूरोऽसि पश्यात्र ते
धाष्ट्र्याच्छातनखाङ्कुरक्षति" मिति द्राग्दर्शयन्ती मुहुः ।
बाधाकैतवतो मनोज्ञनिनदं चक्रन्द चन्द्रानना
तृटचन्निष्ठुरपीवरस्तनपतन्नेत्राम्बुधाराकुला ।।

५७ इत्थं सा सितनयना शोणीभवदायतेक्षणं किञ्चित् ।
विललाप युवकभूसुरमुवाच भूयोऽपि सायासम् ।।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५८ भो ! "यज्ञानयजं तपोऽतप" मिति प्राख्यो दयामन्तरा
यत्पुण्यं रचितं नु तत्फलति किं ? भूतानुकम्पायुतः ।
पुण्यं यज्ञशतस्य कर्तुरखिलं प्राप्नोति नैतत्त्वया
ज्ञातं ? भूसुरवर्य ! सर्वमपि तेऽधीतं किमर्थं ? वद ॥

५९ बहिष्कृतः किन्नु पराशरो द्विजैः
स दाशकन्यासुरतापराधतः ।
विमानना गाधिसुतस्य मेनका-
शरीरसङ्गादभवत्कुले किमु ? ॥

६०. किं मान्दकर्णेरपि कामुकस्य
सङ्गोऽप्सरोभिर्न महत्त्वहानेः ? ।
नाकस्य रक्षां मुनिदारगन्तुः
सङ्घस्सुराणां किमु नानुमेने ॥

६१ किं वा महत्ता बहुला ततस्ते? वाताम्बुपर्णातपभक्षिणोऽपि ।
उपग्रहाश्चन्द्रमुखीगृहेऽयः कौपीनवन्तो मुनिमानिनो हि ॥

६२ श्रुत्वा तदीयवचनं प्रवरस्सजोषं
तद्गात्रसङ्गमदपङ्किलमात्मकायम् ।
संशोध्य वारिणि कृताचमनश्च गार्ह-
पत्यं मुखं दिविषदां ज्वलनं नुनाव ॥

६३ निवहो बृन्दारकाणां भवति हि सुहितस्त्वन्मुखेनैव वेदाः
स्तुवते चेशं भवन्तं भवसि हि जगतां व्याप्य चान्तस्समेषाम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि च स्वाहापते ! त्वं जनयसि सबनं दक्षिणाग्निस्तथैवाऽऽ
हवनीयस्त्वत्त एवोद्भवति च कृपया पाहि मां हव्यवाह ! ॥

६४ दानस्नानजपाग्निहोत्रनिरतस्त्वत्पादपङ्केरुह–
ध्यानानन्दपरश्च नान्यवनितावित्तावनीलालसः ।
स्यां चेन्मामयि हव्यवाह ! करुणासिन्धो ! जगद्बान्धवाऽ
वाचीदिग्धरणीधराग्रगमनात्प्राङ्मद्गृहं प्रापय ॥

६५ इत्थं शुचिस्तेन पनायितस्सन् विश्वम्भरानिर्जरतल्लजेन ।
काये तदीये श्रितरक्षणाय स आश्रयाशोऽपि च सन्न्यधत्त ॥

६६ अन्तःस्थितेन शिखिना धरणीसुरोऽसा–
वुत्तप्तकाञ्चनरसप्रतिमानधामा ।
सान्ध्यारुणातपपरीतदिनेशकल्पः
प्राकाशयन्निखिलमेव वनं स्वकान्त्या ॥

६७ स्वग्रामयानपरिपन्थिवरूथिनीह–
त्कञ्जातरागमकरन्दरसाम्बुधिं सः ।
कल्लोलयन्नवनिनिर्जरशीतरश्मिः
प्रायाद्गृहं ज्वलनजातमरुज्जवेन ॥

६८ इत्थं स्वकीयभवनं समुपेत्य नित्य–
कृत्यानि तत्र स यथाविधि संविधाय ।
सौख्येन दारपितृशिष्यगणैस्समेत
आनन्दतुन्दिलमनाः प्रवरो बभूव ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६९ श्रीकुण्टिमद्दिपुटभेदनशेषशर्मा
श्रीपेद्दनार्यमनुसम्भवमान्ध्रकाव्यम् ।
प्रोवाच संस्कृतगिराऽत्र वरूथिनीस-
ल्लापाभिधोऽयमगमल्ललितो द्वितीयः।।

इति श्रीकुण्टिमद्दि श्रीनिवासाचार्यस्य पण्डितप्रकाण्डस्य पौत्रेण रङ्गाचार्यस्य पुत्रेण शेषशर्मणा विरचिते संस्कृत मनुसम्भवमहाकाव्ये वरूथिनीसल्लापो नाम द्वितीयः सर्गः ।।

———

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुसम्भवः

तृतीयः सर्गः

१ याते भूसुरतल्लजे सुमधनुःकोदण्डमौर्वीरव-
क्षोभाकम्पितमानसा तदनु सा रम्यां तदीयाकृतिम् ।
ध्यायन्ती विवशाऽलसा क्षणमपि स्थातुं च तत्राक्षसा
वभ्रामाचलमेखलामनु वने मग्ना व्यथासागरे ।।

२ भ्रामं भ्रामं भूसुरसरणिं चान्विष्य निष्फलायासम् ।
पुनरागत्य सखीभिर्विधुबिम्बमुखी व्यचिन्तयन्मनसि ।।

३ मत्वा हन्त ! तृणाय मामकरतिं त्यक्त्वा दयां मां निर-
स्याऽयात् धिक्कृतमद्भ्रु जान्तरसुखो विप्रस्तरेयं कथम् ।
हाऽपारं नु वियोगसागरमहं भाग्येन शून्या क्व वा ?
तत्क्रोडः क्व नु वा? करोमि च विधेः किं वा? गतिः का नु वा?।।

४ व्यादीर्घाश्चिकुरा मधुव्रतचयं दूरं निरस्यन्त्यहो
गात्रं तस्य सुगन्धिकाञ्चनतिरस्कारक्षमं तन्मुखम् ।
पूर्णं जोषयतीन्दुमद्रिशिखरावंसौ वलग्नं पुनः
मृग्यं हन्त ! सहस्रपत्रजयिनी फुल्ले तदीयाम्बके ।।

५ किं सौन्दर्येण? किं वा नवतरुणतया? जीवितेनापि किं वा?
यस्या इन्दीवराक्ष्या रतिभिरतिवशो नव्यतारुण्यमूर्तिः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कान्तो यत्प्राणकान्तौ न जनयति सुखं निस्तुलं चैकतानः
प्रेम्णा सम्मान्य यस्या दृढवलितभुजाबन्धमालिङ्गनेन ।।

६ कियत्तप्त्वा जाता ननु मनुजपङ्क्तेजनयनाः
कृतावज्ञे कान्ते विजहति किलासून् सुखमरम् ।
अमर्त्याऽहं लज्जे मरणरहिता दुःखविवशा
वृथाऽभूत्सौन्दर्यं वशिकभवने दीप इव मे ।।

७ इति तर्कयन्ती; दुर्विदग्धेन पुनः पुनः परिभवकारिणा विषमाशुगेन पुङ्खानुपुङ्खं प्रयुक्ताभिस्ताडिता निशितसायकपरम्पराभिः, परां कोटिमाटीकता विरहदहनतापेन सन्तप्ता दीर्घमुष्णं च निश्वसन्ती; निश्वासपवनविघूर्णित चिन्तासागरपरीवाहैरिव, विनीलकनीनिकाकान्तिपूरैरिव, विशृङ्खलमुच्चरद्भिः पक्ष्माञ्जनरेखां विद्रावयन्तीभिः दर दलदरुणकमलनीकाशनयनान्तेभ्य आपतन्तीभिः, आपूर्य कर्णद्वयीकुहरे, निपत्य च तनुतापतप्ते ताटङ्कयुगले धूपमुद्वमन्तीभिरस्रुधाराभिराकीर्णपाण्डुगण्डस्थला ; बिसकिसलयसगन्धमणिबन्धसङ्गतचिकुरबन्धा ; दरशिथिलादुद्वमत्कुसुमविसरात्कबरीभराद्विस्रस्य अन्धकारशङ्कावहेषु निस्सीमप्ररूढमेदुरचिकुरेषु राशीभूय शरीरमावृतेषु, विविधतारकागणपरिष्कृतविनीलगगनमुपरि निपतितमिव विराजमानेषु, परिभ्रष्टोत्तरीयपरिदृश्यमानगाढबन्धुरोरोजकुम्भयुगे, अनुक्षणमुत्पतत्पुलकाङ्कुरसस्याऽऽसेचनाय निस्सर द्दुर्वारवारिपूर इव उपर्युपरि सकलाङ्गस-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुन्मिषन्निदाघजलदिविजगङ्गातरङ्गिणीप्रवाहे ऽमज्जनायेव सन्दानितकुम्भप्लवद्वय इव शोभायमाने, कुपितहरनयनशिखिशिखाभस्मीभूतस्मरविरहशोकतप्ता गृहीत्वा चन्द्रमसं रुदन्तीव रतिः कुसुमितलतान्तनिशान्तशशिकान्तवेदिकोपरि परिलुठन्ती अनुभवति स्म विविधदशान्तराणि; ततः,

८ "युवतिमनङ्गसाद्वत विधाय सुदारुणपुष्पबाणस-
ञ्जनितनितान्तशुक्परवशामदयो धरणीसुराधमः ।
अमरनितम्बिनीमगमदेष निजेन च हा ! पथेति भी-
कररुचिमग्रहीदिव रुषा नितरामरुणोऽरुणोऽभवत् ।।

९ उरुदरीकुहरसुप्तोत्थशार्दूलेषु
झरवारि शोणितमिति पिबत्सु
वनकुञ्जशाद्वलतलचरेषु मृगेषु
धावत्सु काननदवभयेन
पश्यत्सु काषायविभ्रमेणाश्रम-
पादपशाखिका मुनिचयेषु
हेमाद्रिशङ्क्याऽवतरत्सु घनसानु-
शृङ्गनितम्बेषु निर्जरेषु
रुरुचिरे मञ्जुपालाशमृदुकिसाल
घुसृणकिसलयकङ्केलिसुमसमाश्च
बन्धुजीवजपापुष्पबान्धवाश्च
जठरसूर्यातपा हिमगिरितटेषु ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१० श्रेणीभूय पपात पक्षिनिवहोऽनन्ते दृषत्सञ्चयः
कोष्णो जीर्णरविप्रभाभिरभवत्सूर्यो जपासन्निभः ।
शुष्कोऽभून्मृगतृष्णिकाब्धिरभवन् शोभादरिद्रा दिशः
कासारेषु सरोरुहाणि मुकुलीभावञ्च भेजुस्तमाम् ।।

११ "मार्ताण्डोऽस्तं गच्छत्यायाहि त्व" मितिशशिनमाह्वयितुम् ।
यान्त्यश्छाया रजनीदूत्य इव प्राङ्मुखास्सस्रुः ।।

१२ पश्चिमपारावारे तद्गतबडवावलोककुतुकानाम् ।
तरसा तुरङ्गमाणामपहृतरथ इव ममज्ज सप्ताश्वः ।।

१३ तदानीम् ।

१४ यं कञ्चिदपि वीक्ष्य विं रुदन्ती मुहु–
विह्वलाऽभीयाय सैकतेषु;
गत्वा विलोक्य नात्मीयस्स चेद्व्योम-
सीम्न्युन्मुखी मृगयाम्बभूव;
आन्वष्य सास्राक्षमम्बुजस्था शुष्क-
चञ्चुमामज्जयामास वारि;
मज्जयित्वा पातुमसहमाना प्रति–
बिम्बमात्मेश इत्यनुजगाम;
एत्य पत्रेषु तिमितेषु कमलमन्य-
दाजगाम च भृङ्गानकुट्टयच्च
काऽपि विरहातुरा प्रियमार्गणाय
चक्रवाकी ययौ दिनान्ते पुनश्च ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१५ तपनमण्डलपातशीर्णार्णवान्तरु-
द्गतशेषफणिमणीविद्युत इव,
दिवसावसानसन्दीप्तास्तगिरिशिखा-
ज्योतिर्लताप्रतानातप इव,
तपनधूर्दण्डनिर्दलितकञ्जाताण्ड-
कर्परकर्बुरकान्तय इव,
चण्डीशताण्डवोत्सवसम्भृतक्षपा–
हस्ताग्रदीपिकादीप्तय इव
द्राग्विदाहविधूननकुशलवरुण-
हास्तिपककल्पितारुणमृत्तिकेव
मदवदञ्जनालानसन्निहितभूमि–
भागतल्पे पितृप्रसू राजते स्म ।।

१६ बहुलजलप्लवमानद्रुहिणाण्डोऽन्तश्च्युतेन सलिलेन ।
कालोऽभूदिव चण्डातपविरहादन्धकारमावव्रे ।।

१७ तदानीम् ।

१८ कस्तूरीपङ्कलिप्रं कपटमृगवधाजीवकान्ताशरीरं
पूरं कादम्बयुक्तं दिनमणिदुहितुः बर्हचूडं मुकुन्दम् ।
अद्रीन्द्रं चाञ्जनाख्यं सजलजलधरं खञ्जरीटं मदेभं
धिक्कृत्योज्जृम्भते स्माऽन्धतमसमभितः केकिकाकोलभृङ्गान् ।।

१९ श्रुत्वा सन्निहितो निशापतिरिति प्राची पतन्तीं मुखे
संस्कर्तुं निबिडान्धकारचिकुरश्रेणीं समालम्बत ।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दान्तां कङ्कतिकां कराम्बुज इवात्यन्तं विरेजे पुरः
प्रोद्यच्छीतमयूखभानुशुचिता पीयूषपूरायिता ।।

२० कालस्सन्तमसाञ्जनं नयनयोर्धृत्वोदयच्चन्द्रमो
रोचिः पान्थनवीनरक्तकलितं तारान्नमभ्रे बलिम् ।
कीर्त्वा दीप्तवसुं समाहरदिवाङ्काय दातुं निधिं
चन्द्रोऽराजत पाकशासनदिशाकाशे स्फुरन्मण्डलः ।।

२१ विबुधाधीशदिशामुखप्रविलसज्ज्योत्स्नाग्निकीलावृता
जलजागारपरम्परोपरिमिलद्वाह्यच्छदश्यामला ।
उषिताऽम्ला यदि वाऽऽन्तरस्थितरटल्लोलम्बमाला रया-
दुदयन्ति स्म बहिस्समं सिमसिमच्छब्दैश्च धूम्या इव ।।

२२ अस्यन्दन् मिहिकांशुकान्तमणयोऽजृम्भिष्ठ वारान्निधिः
ध्वान्तं ध्वस्तमभून्मुखानि धवलीभावं दिशां लेभिरे ।
जीवञ्जीवयुगानि खेलनपराण्यब्जेषु कोकावली
मग्नाऽऽसीद्विससर्ज कैरववनीपत्रालिराविध्दताम् ।।

२३ मारश्शातयति स्म सूनविशिखान् जग्लुश्च पान्थाङ्गनाः
गर्वोऽधावत जारचोरनिवहस्याऽऽकाशरङ्गे सताम् ।
दीप्तिस्तानवमाप शीर्नमभवत्प्रालेयवारस्तदा
दृक्कोणारुणिमा च खण्डितमृगाक्षीणां लुलोप क्रमात् ।।

२४ उदयग्रावशिरस्थधातुरुचिभिस्सभ्फुल्लसौगन्धिक-
द्युतिरद्योतत चन्द्रमा धरणिभृच्छृङ्गे जपासन्निधौ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्फटिकाश्मेव ततोगतश्शुचिरभूत् सन्मार्गसञ्चारिणो
विकृतिस्सङ्गतिसम्भवा भवति किं नित्या प्रकृत्या शुचेः ? ॥

२५ कामोत्साहविवर्धनाय सततं क्षीरेण सम्पूरितेऽ
भीकानां ग्रासनाय कालभिषजा बध्वा दृढं पारदम् ।
भेषज्यस्य कृता घुटीव निहिता रौप्ये पुनर्भाजने
चन्द्रोऽराजत चन्द्रिकाधवलितेऽजाण्डे नभोमध्यगः ॥

२६ कृताभिषेचने राज्ञि तेजस्विन्यनुधावति ।
धावति ग्रहराजे च बन्दी छाया नु लाञ्छनम् ॥

२७ सर्वाणि धवलीकृत्य 'च्छायां श्वेतयितुं क्षमा ।
नें'ति शोकाध्दिमाश्रूणि तत्याजेव च कौमुदी ॥

२८ व्याकोचकैरववनानि सरांसि काम-
माक्रम्य नैजशुचिदीधितिधालधल्यैः ।
प्रादर्शयत्प्रभवगेहवसुप्रभावं
ज्योत्स्ना तदा कलशसिन्धुसुतामतल्लीम् ॥

२९ दिग्धे तदा धवलचन्द्रिकया किलैकी-
कर्तुं समस्तमपि वर्णचयं समग्रे ।
रोदोऽन्तरे 'तुहिनदीधितिबिम्बमेत-
देते ग्रहा' इति जना विविदुर्न किञ्चित् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३० चकोरकाणां द्वन्द्वानि पपुराचञ्चु शीतलाम् ।
सान्द्रसुस्निग्धमधुरां चन्द्रिकां तां सुधामयीम् ॥

३१ फुल्लमल्लीरजोदिग्धा मत्तेन्दिन्दिरसञ्चयाः ।
नदन्तो द्योतमानाश्च खद्योता इव बभ्रमुः ॥

३२ तादृशी चन्द्रिका, इन्दूपलनिष्यन्दबिन्दुभिरिन्दीवरमरन्दैस्सङ्गतान् हिमानीझरान् तीर्त्वा कथञ्चिदलसालसेन मन्दमारुतेन मनागिव चालितेतु उपवनकदलीकेतकीतालहिन्तालनारिकेलपूगावलीकोमलपलाशेषु शरधितरङ्गेष्विव परिस्फुरन्ती, पुष्पिता इव द्योतयन्ती समस्ता लताः फुल्लशरवणायमाना, चन्द्रातपत्वात् स्फटिकतलेषु मरीचिकास्सञ्जनयन्तीव ससर्प ।

किञ्च शृङ्गारचेष्टाविमुखानपगच्छतः प्रियाननुसृत्यगमनेन नूपुरेषु नदत्सु विस्रंसमानेषु धम्मिल्लेषु निश्वासपवनजवेन प्रच्युतेषु चेलाञ्चलेषु सम्भाव्य च गाढपरीरम्भेण उक्वा प्रियोक्तीः चुम्बनोन्मुखीनां युवतीनां दन्तमरीचिभिः पास्पर्ध्यमानया; एकान्तालापेषु सति गोत्रस्खलने प्रणयकोपकुपिताः नीरवं रुदन्तीः प्रिया अनुनयतां कपोलफलकानि गृहीत्वा कराङ्गुलीभिरुन्नम्य मुखानि नासामौक्तिकानुरूपं प्रच्यवत्सु बाष्पबिन्दुषु प्रतिफलितां स्वकान्तिमवलोक्य हसन्तीति चुचुम्बिषूणां ताभिः करतामरसैराहतानां कामुकानां वैवर्ण्येन धवलतरायमाणया; लज्जितानामप्युपलालनेन निकुञ्जगतानामनङ्गसङ्गरसङ्गतानामङ्गनानामङ्गसौष्ठवं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चञ्चलपत्रान्तरनिर्गतकिरणदण्डैः प्रदर्शयन्त्या; प्रतिफलन्त्या प्रियप्रार्थनया पुम्भावसमुज्जृम्भितकान्ताङ्गरागहारिश्रमोदबिन्दुषु, सायं प्रतिज्ञातसङ्केतानुसारमगत्वा सङ्केतस्थलं निगूह्य मार्गतरुच्छायेषु पुरो गच्छन्तीरनुगत्वा निरस्य चावकुण्ठनानि स्वदर्शनेन प्रथमं भीतानां प्रत्यभिज्ञानेन हसन्तीनामभिसारिकाणां नेत्रधालधल्येन पुनरुक्तया; विवर्धमानमदनोन्माददोहदमदिरागण्डूषवतीनां चुचुम्बिषत्पल्लवेभ्यस्समर्प्यमाणमधूकनीकाशकपोलतलेषु चकचकद्वज्रताटङ्कमरीचिभिः प्रवर्धितया; निधुवनपरिश्रमनिवारणायाऽङ्गणेषु विश्रम्य परस्परचिकुरप्रसाधनपरकामिनीनां भुजङ्गेषु प्रतिश्रुतरतिवचांसि स्मारयत्सु चकितानां निराकृत्य मन्दहासान्, उदयध्दुङ्कारैर्विटनिवारणविचालितकामिनीकरकङ्कणमणिकान्तिभिराम्रेडितया च चन्द्रिकया विकलहृदया शिथिलधैर्या प्रवालशय्यातले शयितुमसहमाना उत्थाय पनीपतदश्रुकणान्नखराग्रैरुदस्यन्ती वरूथिनी सखीमेवमुवाच ।

३३ कृतसुकृतविशेषा योषितश्चन्द्रिकायां
सममिह हि रमन्ते प्राणकान्तैर्नितान्तम् ।
सुमशरपरितप्ता मन्दभाग्या वसेयं
कथमहमयि! यामो नन्दनारामवाटीम् ।।

३४ उत्थाय तल्पादिति सा वदन्ती
प्रावारकान्तेन निवारयन्ती ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चन्द्रातपं केलिवनं निविष्टा
वियोगवह्नौ तरूणी शुशोष ।।

३५ गलितकुचपिधानं साऽभियाता पृषत्का-
निव सुरभिलवातांस्ताडिता दर्पकास्त्रैः ।
किसलयरुचिशोणं शीर्णधम्मिल्लबन्धा
दवमिव च निकुञ्जं प्राविशन्मर्तुकामा ।।

३६ कनकवलयपङ्क्ति तूर्णमुत्सार्य वल्ली-
मकलयदिव रज्जुं बन्धुकामा शिरोधे ।
दृढनियमितकाञ्ची निर्विशङ्कं सभङ्गे
झर इव निविडायां चन्द्रिकायां दधावे ।।

३७ अपि च मधुकरेभ्यो नात्रसद्रारटद्भ्यः
पतति रजसि कामं कौसुमे मज्जति स्म ।
नवकिसलयचूतानोकहाग्रे च तस्था
वसुषु विगलिताशा फुल्लपुष्पाणि जिघ्रे ।।

३८ एवं रतां साहसकार्यजाते
वरूथिनीं तां परिगृह्य सख्यः ।
कपोललग्ना नयनाम्बुधाराः
प्रमार्जयन्त्यो जगदुस्तदानीम् ।।

३९ मुग्धे ! त्वदीयो व्यवसाय एष
न चाप्सरस्त्रीजनसाम्प्रतं हि ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्व नाकवेश्याजनसुन्दरीत्वं ?
रिरंसुता कुत्र किलैकताना ? ॥

४० मायाहेमसमानुरागविशदीकारप्रवीणस्य ते
युक्तं किन्नु कुलस्य वर्तनमिदं नाकाङ्गनास्त्वत्कृतिम् ।
किञ्चैनामनुमन्वते किमु तनुस्ते चन्द्रिकासंज्वरं
क्षाम्येत् ? किं ललिताङ्गि साम्प्रतमियान्मोहः
कुरङ्गीदृशः ? ॥

४१ त्रस्तायाश्शशिनो वसन्तसमये कन्दर्पदृप्यच्चमू-
स्वेच्छासञ्चरणास्पदे कुसुमितोद्याने विहारात्तव ।
किं शाम्येद्विरहज्वरः ? सखि! पदादुत्पाट्य शूकं स्वयं
शङ्कोः कीलनवद्भवेन्ननु वनाद्यामो निशान्तं द्रुतम् ॥

४२ इत्युक्त्वा तां कान्तामनुमान्य च निन्युरङ्गना भवनम् ।
शयिता शयने स्वोपरि करान्किरन्तं निनिन्द शशिनं सा ॥

४३ दोषाकरत्वमेव हि राजत्वफलं निशाचर तवेदम् ।
गुरुसेवायाऽपि न च ते विवेकिता विरहिणीप्रमापयितुः ॥

४४ मित्राद्रूपस्य सिध्देः मखविघटनकृत्पादघाताच्छरीरे
काष्ण्यात्काले प्रकाशादपि च घनगदायोगतस्तेऽन्तकस्य ।
पाण्डुक्षेत्रप्रवृत्तेर्धृतपरिधिगुणाद्रक्ततारानुयोगात्
को भेदः प्राणिहिंसाकृतिषु? स हि वरं नान्तधर्मेण राजन्! ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४५ लोकानां कण्टकं त्वां घसति फणिवरो वैरनिर्यातनार्थं
कश्चित्पातालालोके विशकलिततनुं भूमिलोके मृगाङ्क! ।
जीवंजीवा ग्रसन्ते दिवि च हुतभुजो भुञ्जते नन्वजस्रं
कण्ठाश्लेषानुरक्तप्रियजनविधुराः कामिनीः पीडयन्तम् ।।

४६ नक्तञ्चर ! वातापेरध्यैः किं ? तुन्दगोऽपि नैव त्वम् ।
जीर्यस्यमरत्वान्न हि सुरा म्रियन्ते न चेन्न किं हंसि ? ।।

४७ त्रिपुरासुरसंहारे चक्रीभूतस्य नाभिमकरोत्ते ।
गिरिशः त्वां हन्ति न तद्विकटीभूत्वाऽपि रोहिणीसङ्गात् ।।

४८ पयसि जननाद्भवेत्किं साधुगुणो नीरजाराते !
ननु दहति विना करुणां कृपीटयोनिर्जगन्ति निखिलानि ।।

४९ साकंजातरमालयसम्पन्निर्मूलनप्रवृत्तस्य ।
गुरुतल्पगामिनस्ते स्त्रीहननं किं जुगुप्सितं चन्द्र ! ।।

५० कतिचिदहानि शिवस्त्वां मौलौ धृत्वा कलङ्किनं जानन् ।
दक्षाध्वरे च रोषादपातयद्भुवि न शुध्यसि तथापि ।।

५१ विजयमगात्तव करगतगाण्डीवं प्राणिनो वयं नो चेत् ।
चण्डैरखण्डयिष्यश्शितभल्लैस्सह च भागिनेयेन ।।

५२ इति चन्द्रमसं दूषयित्वा सा कान्ता लतान्तसायकैरात-
ङ्कमातन्वन्तं रतिपतिमेवमुपाललम्भे ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५३ संरम्भाद्विषमाम्बकं लघुतया गृह्णन् शरैराक्रमन्
स्फूर्जद्धूर्जटिफाललोचनाशिखिज्वालालिदग्धोऽप्यहो ! ।
पान्थान् पीडयितुन्नु जीवसि पुनर्नेत्राम्बुभिः स्थाणुवत्
रत्या मङ्गलसूत्रभाग्यमहिमा कन्दर्प ! तस्याः कियान् ॥

५४ दाक्षिण्याद्विषमाम्बकेन नयनाग्निः प्रेषितोऽपि स्वयं
स्वाहाकामुक इत्यसौ न दहति स्म त्वां न चेद्राजसे ।
देहेनैवमहो रतीश ! कुसुमप्रस्पर्धिना प्रायशः
साहाय्यं वितनोति दैवमथ वा दोषाकराणां भृशम् ॥

५५ लावण्यं निखिलावनीतलगतं सञ्चिन्त्य चानाविलं
राशीकृत्य कृतस्वरूप ! सुमनःकोदण्ड ! भोगिन् ! कथम् ।
हस्ताब्जं कृतहस्तमङ्ग ! दयिताचेलाञ्चलाकर्षणे
मृद्वङ्गीष्वयुनक् कठोरशरसन्धानप्रयोगादिषु ॥

५६ इति निन्दन्ती सुदती द्विगुणितमदनज्वरा कुवलयानाम् ।
दलतां रजसां प्रेरकममर्षविवशा निनिन्द पवमानम् ॥

५७ सुगन्धहारिन् ! हरिणाङ्कयोगात्
सन्तापयस्यध्वगसञ्चयं त्वम्
सख्युस्तवाग्नेर्जगतां हि दग्धुः
परापकारस्सहजो दुरात्मन् ! ॥

५८ ग्रसनाय हि ते वेधा रसनायुगलं चकार भुजगस्य ।
एष ग्रहो हि नालं भक्षयितुं त्वां वियोगिजनदुरितात् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५९ इत्युक्त्वा मदनज्वरेण विवशां सम्मूर्च्छितां सुन्दरीं
सख्यः पल्लवपाणयः किसलयैः कर्पूरगन्धोदकैः ।
कल्हारैर्व्यजनैर्मृणालवलयैस्सूक्ष्माम्बरैश्शैवलै–
श्शैत्यापादनमाचरन् कथमपि प्राप स्पृहां सा शनैः ।।

६० ततः प्रादुर्भवति प्रभाते काचित्पङ्केजवदना वरूथि–
नीमेवमुवाच ।

६१ असंस्कारैः केशैः कबलितमिदं लुप्तहसितं
विशीर्णश्रीगन्धं वदनमिव ते शीतकिरणः ।
रवेः कान्त्या लीढो विगलितकलाजालविभवः
पृथूभूताङ्कोऽयं स्खलति ननु प्राचेतसदिशि ।।

६२ सेनानीः किं ससैन्यं चरमगिरितटं गच्छतश्शीतरश्मेः
नासीरे सप्तसप्तेर्ध्वजगतमुकुरः किं ? रवेश्शांभिकस्य ।
आतोद्यानां नु शङ्खः ? किमु मिहिरविधेर्दर्शितो राजहंसः
शुक्रः प्रोदेति तारापथमहितरवेस्सूचनायेव बन्दी ।।

६३ सकलाशागतिनर्मकोपविरतिश्रौतक्रियारम्भस–
म्भृतवर्गतृतयं मरुच्चरितनिध्वानैकमूलं जनाः ।
श्रुणुतेति प्रकटं त्रिभङ्गिविरुतं सम्भुग्नकण्ठं धरा–
धरशृङ्गस्थितपक्कणेष्वतनिषुः गोष्ठाग्रगाः कुक्कुटाः ।।

६४ अस्ताद्रिं याति सूर्ये हृतरविरुचयो दीपिका वीक्ष्य भूयोऽ
प्यायान्तं तं तदीया रतिविवशवधूनेत्रकोणेषु भासः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गूहित्वाऽदाय शौक्ल्यं तदनु गतमिमाः काज्जलं वन्धुभावं
सम्मान्यात्मीयरूपं सुतनु पिदधतीवावदातीभवन्ति ।।

६५ सज्जीकृत्य पुरा तथैव निहिता नाटस्य मान्द्यात्त्वया
गायन्त्या नु तदादि लोलनयने ! याऽपस्वरं गायति ।
वीणां काल्यसमीरवारविचलत्तन्त्रीं प्रभातेऽधुना
युक्तालापमयीं कुरुष्व सखि ! तां देशाक्षिरागानुगाम् ।।

६६ वाचामभ्यासकाले मृदुमधुरवचा जोषमास्से त्वमेवं
जृम्भावन्तस्सभङ्गाश्शितनखशिखरैः किञ्च कण्डूयमानाः ।
उन्मीलत्सामिनेत्रा वनविहगरुतान् स्वैरमाम्रेडयन्ति
प्रोद्ग्रीवाः पञ्जरे तान् कमलमुखि ! शुकान् पश्य
शारीकिशोरीः ।।

६७ सन्ध्यासूर्यप्रकाशारुणधरणिरजःपूर्णविध्यण्डमध्यं
कालव्यायामशूरे विशति च खुरलीरङ्गमादित्यचन्द्रौ ।
तत्प्राचीपश्चिमक्ष्माधरभुजशिरसोर्न्यस्तगोलाविवेतौ
राजेते बालवृध्दौ ककुभि सुरपतेः पाशिनो व्योमसीम्नि ।।

६८ नीडात्काण्डविलोडितादिव खगा भास्वत्करामर्शना-
न्मन्दोन्मीलितपङ्कजान्तर अमी रारट्यमाना मुहुः ।
द्वारप्रान्तमुपेत्य बम्भरदणा गत्वा ततोऽभ्यन्तरं
वीणावादनवत्सरोजमुकुलान्निर्यान्ति पद्माकरे ।।

C-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६९ संलग्ने नवभानुभानुदहने पङ्केजकोशान्तरात्
राशीभूतपरागधान्यनिचयं पृष्ठे पिशङ्गच्छलात् ।
कान्ते ! तावककेलिनन्दनवनीपद्माकरे षट्पदाः
बिभ्राणा अपयान्ति लोकय चलत्ताराप्रभावीचिभिः ।।

७० दैवात्प्रातस्समेतान्यपि विरहकथाचिन्तया विह्वलानां
कोकानां मञ्जु गुञ्जन्त्युपरि परिपतन्त्यङ्गकान्यामृशन्ति ।
द्वन्द्वान्याश्लिष्टकण्ठैर्विषधरसदृशैरश्रु सम्मार्जयन्ति
प्रेमोद्रेकेण फुल्लत्कमलमुखि ! रतेर्नैव किञ्चित्स्मरन्ति ।।

७१ इन्द्रः किं? किं विधुः? किं धनदपतिसुतः? किं जयन्तो? वसन्तः
किं? वोपेन्द्रस्स किं वा? कुत इयमियती वेदना ते तदर्थम् ।
गच्छामोद्यानमद्याऽप्यवनिसुरवरस्तत्र तिष्ठेदवश्यं
सौन्दर्यं ते युवानं भ्रमयति न च कं नोन्मदिष्णुं तनोति ।।

७२ किन्ते सुन्दरि ! वेदनाविलुठनैः ? क्षान्तिं कुतो वाऽत्यजः?
कार्यं तावदिदं कियन्नु ? वसुधादेवः कुमारोऽपटुः ।
आश्लिष्टो विमुखीबभूव स तदा कालेन चैतावता
नूनं तस्य तवेक्षणावधि भवेन्नैकत्र पादद्वयम् ।।

७३ एहीत्याहूता सा वरूथिनी निकटनाकसिन्धुजले ।
कल्हाराम्भोरुहमधुचन्द्रकिते धौतवदनविधुबिम्बा ।।

७४ तर्जन्या तिलकीचकार च वयस्यानीतचन्द्रद्रवं
सख्यानीतसुमस्रजामकुरुत प्रभ्रष्टमेकामसौ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धृत्वा निःस्पृहविश्लथं मणिमये सख्याहृते पादुके
द्वित्राणि क्रमुकाणि चर्वणकटूनीत्युद्गिरन्ती शनैः ॥

७५ सा सामिजग्धमृदुनागदलञ्च सामि–
दत्तोत्तरं सहचरीवचसां सखीभिः ।
आसन्ननिष्कुटमगाच्च धिया च सामि–
मोहेन सामितनुना वपुषा स्मरार्ता ॥

७६ तस्मिन्नेव समये देवजातित्वजनितविमलविज्ञान–
पाटवविदिततदीयसकलवृत्तान्तः ।

७७ कश्चित्तद्रूपलीलाविभवमसकृदालोक्य बध्दानुरागः
कामिन्या वैमनस्यादपि च परिहृतः पीडितः कामबाणैः ।
कान्तारागानुबन्धव्यपनयनकलाबालिशो दूरदर्शी
गन्धर्वः कामतन्त्रे स्वहृदयसरणौ तर्कयामेवमास ॥

७८ रारज्यन्ते कदाचित्सरसिजनयनास्ता विरज्यन्ति जातु
स्वान्तं पत्रे बिसिन्या जलवदनुपदं चञ्चलं यौवतस्य ।
नोच्छिन्द्याद्रागवल्लीं झडिति सुललितैस्सान्त्वनैस्सुन्दरीणा-
मावर्जोपायजातैर्हृदयमुपसरन् रञ्जयेत् स्यात्सुखी च ॥

७९ इत्थं विचिन्त्य स विलासवनं तदीयं
पुष्पाभिराममुपगम्य पुरोगमस्सन् ।
मायानिगूहितनिजाकृतिरूपरेखः
तस्थौ च चन्दनलतां कलयन् करेण ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८० अर्धेन्दुस्पर्धिगोधिस्फुरदमरनदीमृत्तिकापुण्ड्रचिह्नै-
र्गण्डादर्शप्रसर्पद्रुचिरुचिरमणीकर्णभूषायुगेन ।
प्रावारेणारुणेनोज्ज्वलकनकलताराजिरोचिष्णुनाऽम्भ-
श्शोणेनाऽधोंशुकेनोपरि सुमणिकटीसूत्रभाशोभितेन ।।

८१ काशीमुद्रोर्मिकापाण्डुब्रह्मसूत्रैश्च सोऽभवत् ।
प्रवरश्शान्तभूयिष्ठब्रह्मवर्चसभासुरः ।।

८२ एकत्र साऽपि सखिभिस्समुपास्यमाना
चञ्चत्पदाङ्गदरवाहृतराजहंसा ।
चाम्पेयवञ्जुलकुरण्टकदाडिमाम्र-
शेफालिकालिकुचशोभि वनं प्रपेदे ।।

८३ त्यजन्नाशीविषक्रूरगरफूत्कारकाटवम् ।
वाति यद्वनसम्बन्धान्मलयाचलमारुतः ।।

८४ फालाक्षघोरहुङ्कारजातमस्तिष्कमत्तताम् ।
गुञ्जदिन्दिन्दिरारावैर्यत्र त्यजति मन्मथः ।।

८५ घर्मसामीप्यसञ्जाततापं मुञ्जति माधवः ।
यद्वीरुद्वेल्लितमहीरुहच्छायसमाश्रितः ।।

८६ गरसौदर्यजसुधातिक्ततामोषधीपतिः ।
नूनं मुञ्जति यत्रत्यसुमनोरसवीचिभिः ।।

८७ तादृशपुष्पितलतावितानमुद्यानवनं निविश्य ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८८ पवमानप्लवमानपङ्कजरजःपालीपिशङ्गच्छवी–
भवदभ्यर्णविकीर्णकृत्रिमसरित्पाथस्तरङ्गाहते ।
तुहिनांशूपलरम्यकुट्टिमतले नालीकपत्रेक्षणा
विहरन्ति स्म कुतूहलेन सरसव्याहारलीलाचणाः ।।

८९ उद्वृत्तो धवलः परागनिवहैरुद्ग्रीव उत्तंसित–
स्सोऽयं कोकिलशावकेन सुमनस्सान्द्रो रसालद्रुमः ।
मुक्ताहाररुगङ्गरागकलितः श्यामोन्नमच्चूचुको
नूनं भाति वनेन्दिराघनकुचः कान्ते समालोक्यताम् ।।

९० वनदेवतागृहाणां दीपशिखाश्चम्पकानि नैवं चेत् ।
इन्दिन्दिरसन्तमसं कथन्नु धावेद्विलोकनात्तेषाम् ।।

९१ रम्भां भूरितरानुरागसुमनोभारां दृढं तापस–
क्रोडीाकाररतां च पल्लवकरैः पश्येति सख्युर्वचः ।
श्रुत्वा सैवमुवाच "रागसुमनोभाराच्च किं वाऽद्भुतं
रम्भायाः करपल्लवैर्दृढतरं तत्तापसालिङ्गनम्" ।।

९२ लोचनयुगलोद्वेजकलोहितरुचिमुद्वमज्जपाकुसुमम् ।
प्रसृमरतमालकाननतमिस्रनिवहस्य कल्यभानुरभूत् ।।

९३ उपरिविनीलनिरन्तरदलधाराधरसमूहधारावत् ।
गूवाकुकाण्डजातं जनयति वर्षर्तुसम्भ्रमं ललने ।।

-0. Agamnigam Digital Preservation Foundation, Chandigarh.

९४ किं पश्येम सुपक्वशुक्तिकुहरान्तर्दृश्यमुक्ताफल–
स्तोमाधारतटेन सुन्दरि! समैः श्रीताम्रपर्ण्यास्सखि! ।
मूलैर्जीर्णपलाशसञ्चयपुटीमध्यस्थसूनोच्चयै
रम्यानङ्ग ! मधूकपादपचयान् गत्वा च तद्वाटिकाः ।।

९५ अभिषेणनाय विरहिष्वाज्ञापयितुं स्मरस्य निजसेनाम् ।
चालितकर इव मारुतकम्पितकङ्केलिपल्लवो जयति ।।

९६ दिष्टे पल्लवचर्वणस्य वदनप्रान्ते तु दष्टेऽलिना
धावन्तीं वनशाखिकासु परभृद्योषां कुवाराविणीम् ।
सान्त्वालापनकैतवेन लपनं निस्ते च तस्याः पिकः
मायामोहनशालिनो हि पुरुषाः कालेऽनुकूले किल ! ।।

९७ वनमेवं शंसन्त्यश्चेलाञ्चलसुदृढवध्दकुचकुम्भाः ।
आबध्दवेणयस्ता अनिमिषकान्तास्सुमापचयकुतुकाः ।।

९८ साऽऽदिलूनं सुमं मौलिमारोपयत्
कीदृशं चापलं ? मन्मथं नार्चयत् ।
किं कपोतारवं त्वं समाकर्णय–
स्येष रम्यो वियुक्ताङ्गनावाधकः ।।

९९ केसराण्यङ्गनेऽन्वेषयैतत्सुमाऽऽ
मोदवारो हि धम्मिल्लसंवाहकः ।
पल्लवाय त्वमेवाधुना मां नियु–
ज्योचिता निष्ठुरोक्तिर्न ते कामिनि ! ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०० कुन्दसूनस्रजं नैव यच्छामि ते
किन्तु मूल्येन ते सा मयाऽऽपीडिता ।
चञ्चरीकोपहारीकृतं केसरं
किं तयाऽज्ञानतस्तल्लुनन्त्या सुमम् ।।

१०१ स्पर्धते केसरो नूनमेष त्वया
दूषयन्त्या स्मरं सान्द्रपुष्पोद्गमः ।
आमृशैनं प्रियालुं परागाय ते
कौसुमं कङ्कणं नन्विदं दीयते ।।

१०२ गच्छ मा रंहसा नैव पश्येम स–
म्फुल्लसूनासवस्यन्दने काननें ।
नैष कङ्केलिगुच्छो हि पालाशकः
कः पणो नन्वयं गोस्तनो मौक्तिकः ।।

१०३ पश्य रम्भां प्रसूतां च भुग्नामिमां
किं प्रसूत्या तया या नयत्यापदम् ।
केतकीयोगतस्ते रजस्सङ्गमो
नैव तत्कामिनीकर्णपिष्टातकः ।।

१०४ जातिरेषाऽमितं बम्भरायार्पय–
त्यासवं षट्पदो नैकतानो ह्ययम् ।
पाटलारोहणेहा हि ते रोचते
किन्त्वपायं पुनर्मानसं शङ्कते ।।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०५ वायुपाटच्चरः कृष्णलान्याहरत्
त्वं लुनीह्यग्रतस्तानि कुम्भस्तनि ! ।
लोचने मीलयैते नु राजीवधी–
मोहितष्टिट्टिभो भण्डते सन्निधौ ।।

१०६ किं पराऽन्योन्यमित्यन्यतो गम्यते
गृह्यतामेत्य लामज्जकं त्वं पुरः ।
सप्तपर्णीभवश्चन्द्रसंज्ञोऽसमो
लाञ्छितश्चन्द्रमा नूनमस्यासमः ।।

१०७ सा गुवाकुप्रसूनाय सर्पत्यहो
च्छिन्नबन्धाःभवत् स्रंसते पश्यताम् ।
पञ्चमेनाह्वयत्यङ्गने ! श्रूयतां
चूतशाखागतः कोकिलो मारुतम् ।।

१०८ चम्पकान्यश्रमेणैव लब्धानि न–
न्वन्यकुञ्जेषु ते मार्गणं मुच्यताम् ।
नैव दूरं हि गच्छेत युयं समै–
र्नूनमेनैरलं चेति ताश्चिच्चिरे ।।

१०९ बिसमधुमत्तमरालीमुखरेन्दिन्दिरमनोहरे सरसि ।
अवतीर्य प्लवमाने जलकेलीरसकुतूहला लिजने ।।

११० शुष्केणाननसारसेन युगलेनापाण्डुना चक्षुषो–
र्हस्तन्यस्तहनुस्थिता तटतलेऽप्याहूयमाना मुहुः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अम्भःकेलिपरालिभिः प्रणतिभिस्ता वारयन्ती करे-
णैकेनैव दिशासु निःस्पृहदृशो व्यापारयन्ती क्वचित् ॥

१११ कुवलयघनकुल्याकूलवल्लीवनाली-
जनितगगनसर्पत्पुष्पधूलीसमूहे ।
रविकिरणमनोज्ञे व्योम्नि बम्भ्रम्यमाणे
व्यणुकबहुलवात्यालोललोलम्बबृन्दे ॥

११२ चञ्चत्काञ्चनकङ्कणाञ्चितभुजं व्यापारयन्तं मुहुः
कुञ्जे वेदजटां चलद्रदपटं स्वादूच्चरन्तं शनैः ।
अन्विष्यन्तमिवायनं सकलदिग्व्याबध्ददृक्तोरणं
तप्तस्वर्णसवर्णदेहरुचिभिर्विद्योतयन्तं वनम् ॥

११३ व्यादीर्घकालाहिसमानकेश-
नैल्येन भृङ्गानधमर्णयन्तम् ।
देवार्चनासूनजयं लवन्तं
ददर्श मायाधरणीसुरेन्द्रम् ॥

११४ दृष्ट्वा मञ्जुरदत्सुवर्णरसना त्यक्त्वा वयस्यान्तिकं
राजत्काञ्चनकेतकीसुमतनुर्यान्ती निकुञ्जान्तरे ।
नीलाम्भोधरमध्यलोलचपलातुल्या च बुध्वा पुनः
स्वप्नालोकितवस्तुदर्शमवनीदेवं ददर्शादरात् ॥

११५ तस्यां सामिनिमीलिताक्षिकमलं हर्षाश्रुधाराकुलं
पश्यन्त्यां नयनान्तशोणकिरणश्रेणिस्ससर्पाग्रतः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आकृष्याश्रुति हल्लकास्त्रमिव चोन्मुक्तं च दष्टाधरं
ताम्बूलीरसदिग्धमिक्षुधनुषा कामेन क्रुध्दात्मना ।।

११६ आदौ व्याकुलतां जगाम हृदयं तस्यास्तदालोकनात्
पादौ चस्खलतुः क्रमेषु च पुनर्द्वित्रेषु वक्त्राम्बुजे ।
दैन्यं प्रादुरभूत्समीपगमने पारिप्लवे लोचने
आस्तां तत्सविधौ बभूव वचनारम्भे स्वरो विस्वरः ।।

११७ तदुत्तरासङ्गपरिग्रहेऽस्याः स्वेदोद्गमोऽङ्गेषु बभूव वक्त्रम् ।
उन्नम्य तद्वक्त्रनिरीक्षणेच्छोर्बाष्पाकुले लोचनकैरवे च ।।

११८ पाटितकरिदन्तद्युतिपाटच्चरमृदुकपोलमुकुरतले ।
निपतति कज्जलमलिनाश्रुणि यत्नाद्वक्तुमेवमारेभे ।।

११९ मात्सर्यं ननु मुञ्च नन्दय च मां मल्लीलतामण्डपे
सम्फुल्लाम्रवणे गृहाण चतुरो यामान् निशायामहम् ।
प्राणेभ्यः कुपिता सुमास्त्रनिहता नेत्राम्बुधाराकुला
ज्योत्स्नायां विवशाऽभवं तव वशीभूताऽभवं पाहि माम् ।।

१२० मामूरीकुरु निर्दयं यदि निराकुर्या विरक्तात्मना
नन्वास्तामनिशं फलं किमु बलात्कारेण भोगेन वा ? ।
आचारेण सुखं त्वमास्व सुचिरं त्वत्सङ्गमाकाङ्क्षिणी
प्राणानाशु जहामि विप्रवर ! भो ! किं छिन्नमेतावता ? ।।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१२१ किं वा वच्मि? करोमि वा किमु पुनः? "क्रूरोऽसि पाषाणत-
श्चित्तं ते कठिनं हि नो द्रवति" चेत्येवं विनिन्द्यापि किम् ।
नैव च्योतसि निश्चयादपि मनाक् भाग्यं किलैतादृशं
नन्वस्माकमनङ्गसन्निभ! विधिं निन्दाम्यहं केवलम् ॥

१२२ इत्येवं वदन्त्यां सुरसुन्दर्यां स कुहनाभूसुरः ।

१२३ कान्तागोष्ठीषु धृष्टास्तरलतरदृशो वारयन् पक्ष्मलाग्रै-
र्मन्दं हासं निरुन्धन् दशनपटपुटे निह्नुवंश्चानुभावान् ।
मायामौग्ध्येन हावान् रसपरवशताजातनर्मानुलापान्
जिह्वाप्रान्ते निगृह्णन् विनमितशिरसा दीर्घमुच्छ्वस्य
तस्थौ ॥

१२४ स्थित्वा पदाङ्गुष्ठनखेन भूमिं
लिखन् मुहूर्तं च विभाव्य किञ्चित् ।
उन्नम्य शीर्षं लघुना स्वरेण
जगाद तां निर्जरसुन्दरीं सः ॥

१२५ मातापित्रोर्विषादाच्चलितहृदययोर्मामकादर्शनोत्थात्
जायायां पीडितायां सवनहुतवहे शाम्यति स्मेरवक्त्रे ।
गेहे सौभाग्यशून्ये कथमिह गहने बन्धितोऽहं दिगन्ते
कां वा सौख्यानुभूतिं बिसरुहनयने प्राप्नुयां ब्रूहि किञ्चित् ॥

१२६ व्याकोचाम्बुजलोचने! शृणु रतावालिङ्गनात्तावका-
द्यत्सौख्यं किमु वाऽस्ति तत्सुरपतेः? किं वा परिव्राडहम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"नेदं माऽस्तु ममे" ति वक्तुमबले ! स्वान्ताय मे रोचते
नोद्विग्नाय रतिर्व्यथाविकलिते सर्वं ह्यसह्यं भवेत् ।।

१२७ इदमस्तु तथापि च ते दैन्यं दृष्ट्वा त्यजामि मे नियमम् ।
अन्येषामुपकारश्शरीरदानेन यदि न तत्त्याज्यः ।।

१२८ किञ्चान्यदेकमिदमपि ललने श्रुणु नियम एष मद्देशे ।
निधुवनसमये नयने निमीलयेत्तद्व्यतिक्रमोऽघाय ।।

१२९ यद्येतत्समयाय नन्वनुमतिस्ते साधु कान्ते ! न चे-
दस्मद्देशमहं हि गन्तुमयि ! किं शक्ष्यामि तन्वाऽनया ।
गङ्गाम्भःकणपूतपादपवनीमध्ये तपस्याम्यहं
हा ! साकं मुनिभिर्विधेर्हिमनगेऽब्रह्मण्यमुद्घोषयन् ।।

१३० आकर्णयान्यन्नियमस्य भङ्गेऽ
प्यब्जाक्षि ! भुञ्जीय हि नापि सौख्यम् ।
यावन्न गच्छामि तवानुमत्या
त्याज्यो न वाञ्छापरिपूरणेऽपि ।।

१३१ ननु किमर्थमेतावदुक्तिरिति चेदुच्यते, अहं हि वैदेशिकः
बन्धुमित्रकलत्राणि विहाय दैवयोगेनेयद्दूरमागच्छम्। तदुपरि
भवदीयप्रार्थनया व्रतहोमाद्यनुष्ठानोत्सर्जनाय सज्जोऽस्मि ।
तस्मान्मदाशयपरिज्ञापनायावश्यं वक्तव्यमस्ति श्रूयताम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१३२ काये तावकपीवरस्तनयुगीकस्तूरिकासङ्गमात्
सौख्यं वाऽनुभवेयमङ्ग! तपसा भिन्द्यामघौघानि वा।
मुक्त्वैतद्द्वितयं वृथेहपरयोर्दूरीभवन् यौवनं
किं नेष्यामि सरोजनेत्रि! उभयभ्रष्टो यथा रेवणः॥

१३३ एवं किसलयिताशं भूमिसुरे वदति हासविकचमुखी।
सुरतरुणी नतवक्त्रा करनद्धपटाञ्चला जगदे॥

१३४ त्यक्त्वा निष्ठुरवर्तनं तव कृपायत्तेन चित्तेन यत्
कर्णाह्लादकरं वचोऽवच इदं "त्यक्ष्यामि न त्वा" मिति।
जातोऽक्रीतभटः स्मरस्सुखपयोराशावमज्जञ्च म-
त्पुण्यौघस्सफलोऽभवन्मम वयो धन्यं च विप्रोत्तम!॥

१३५ "यथा त्वयोक्तं तथा करवाणी" ति तमकरोत्समाहित-
मनस्कम्; अत्रान्तरे समागतास्तदीयास्सख्यः।

१३६ "क्रूरो नन्वसि बुध्दिमानसि महामायाप्रवीणोऽसि किं
क्ष्वेलं खादसि दुर्जनोऽसि कृपयेमां पश्य मायां त्यज"।
इत्येवं क्रमशो निनिन्दुरहसन् सम्प्रार्थयांचक्रिरे
मायाभूमिसुरं तदा नु हरिणीरम्भाघृताच्यादयः॥

१३७ मायाविप्रस्तांस्तांस्तासां परिहासगर्भितालापान्।
श्रुत्वा प्रमुदितचित्तो निर्गत्य वनात्तदा समीपभूभागे॥

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१३८ गङ्गाशीकरशीतले परिपतत्कर्पूरकस्तूरिका–
सौरभ्ये वकुलाम्रपादपवनीमध्ये झरीसैकते ।
मल्लीवल्लिनिकुञ्जमञ्जुलतमे माणिक्यदीपाञ्चिते
मत्तेन्दिन्दिरशारिकाशुकपिकीनादप्रतिध्वानिते ।।

१३९ तत्कान्तामणिमण्डितभवनं दृष्ट्वा विवेश सह ताभिः ।
त्यक्त्वा तौ तास्तत्र व्याजेनैकैकशो ययुः स्वगृहम् ।।

१४० तदनु प्रफुल्ललवलीमल्लीवासन्तिकानवैलानाम् ।
मञ्जुलसान्द्रनिकुञ्जे गुञ्जन्मधुमत्तमधुपसमुदाये ।।

१४१ विकसितहल्लंकतल्पे गन्धर्वयुवा निलिम्पतरुणी च ।
अकृतार्थयतां दर्पकमनियन्त्रितकाङ्क्षितैर्विविधैः ।।

१४२ गाढाश्लिष्टनखम्पचस्तनयुगं सञ्चुम्ब्यमानाधरं
प्रेमाकल्पितदन्तबाधमधिकोद्यद्रोमहर्षाङ्कम् ।
सम्मीलन्नयनं प्रमोदमतनोत् स्वेदार्द्रगण्डस्थलं
शाम्यन्मण्डनरावमाद्यमुरतं तस्याश्च तस्याऽपि च ।।

१४३ नीरवताक्षिनिमीलनपरवशताभिस्तदीयरतिरासीत् ।
आलिङ्गनशिथिलतया तस्य मुदे मुग्धमुन्दरीरतिवत् ।।

१४४ एवं भावजतन्त्रैर्नयतोः कालं महान्तमपि यूनोः ।
अन्तर्वत्नी समजनि सा निर्जरपूर्णिमाशशाङ्कमुखी ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१४५ ततस्तस्याः क्रमशः ।

१४६ श्यामलता चूचुकयोर्गमने जडता शरीरनीरसता ।
अजनिषत रोमराजौ स्फुटता निद्राऽरुची च ववृधाते ।।

१४७ नूनं पाण्डुरगण्डयुग्ममुपरि व्याप्तं तयोस्तानवा-
द्रेजे सुस्मितवत्कुरङ्गनयनालालाम्बुफेनव्रजः ।
गुर्विण्या नितरां रराज च मुदाम्भोराशिरारज्यमा-
नोद्यद्भृङ्गपररोपरिलसद्भिण्डीरखण्डोपमः ।।

१४८ आक्रम्यते स्म त्रिवलिप्रदेशं
मध्यं प्रवृध्दं सुरपङ्कजाक्ष्याः ।
निस्स्वे बलीभूय परार्थहर्त-
र्यन्यः कथं जीवति सन्निकृष्टः ।।

१४९ खेलनगानविहीना तोयजनयना बभौ तदानीं सा ।
पान्थजयशान्तनिस्वनगुणकम्पनमदनचापदण्ड इव ।।

१५० कृच्छ्रेणापन्नसत्वा शिथिलभुजलतं कान्तमालिंग्य मन्दं
मृत्स्ना सौरभ्यभाजा वदनसरसिजेनाधरं हिंसमाना ।
नर्मालापानुरक्ता मणितकृतिविधावक्षमा शंसमाना
कामं तत्केलिसौख्यं स्वयमुपरिरतौ नीरसा सा बभासे ।।

१५१ असमशरसङ्गरोन्मुखदयितं सम्प्रार्थनाशतैरलसा ।
वारयति मन्दमन्दं प्रसभपरीरम्भशुम्भदुद्वेगम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१५२ ज्ञात्वा गर्भशयन्तां वरूथिनीं तां वियच्चरप्रवरः ।
पूरितमनोरथोऽसावेवं चित्ते विचिन्तयामास ।।

१५३ मम गमनाय हि समयो यामि न चेद्विदितवञ्चना नु शपेत् ।
गमनेऽनामन्त्र्य वधूर्म्रियेत वा विषमबाणशरविध्दा ।।

१५४ इति सञ्चिन्त्य स मायाभूसुर आमन्त्र्य गन्तुमना मञ्जरी-
पुञ्जाननलतासोदरीं तामुपेत्य लालयन्नेवमुवाच ।

१५५ कान्ते ! यः पादलेपं मुनिकुलतिलको मे पुराऽदादभूवन्
कार्याण्येवं हि यस्मात् नयनपथमगात् सोऽत्र योगी नगेऽद्य ।
नानातीर्थानि पश्यन् मम नगरपथेनागतः प्राह सर्वा
अस्मत्संसारवार्ताः कथमिति ललनेऽरुन्तुदस्ता ब्रवीमि ।।

१५६ पक्वप्रायाणि शालेयक्षेत्राणि सकलान्यपि ।
पर्यालोकनवैधुर्याच्छुष्कीभूतानि कामिनि ! ।।

१५७ धेनुष्या अभवन् गावः सर्वा द्रोणदुघा अपि ।
रक्षापोषणवैकल्याद्वन्द्यागारे पुरे पुरे ।।

१५८ प्राड्विवाकीभवन्तो हि वटवो वञ्चनारताः ।
गुरवे चार्पयन् विद्यास्सकलाश्च सुशिक्षिताः ।।

१५९ तृणाय यन्त्रणां मत्वा गृहीतानर्थसञ्चयान् ।
अदत्वा कुटिलास्सर्वे चाधमर्णा अवञ्चयन् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१६० अलब्ध्वा राजभवनात्पणं वा क्षणमेव वा ।
अमायां पौर्णमास्यां वोपरागे सङ्क्रमेऽपि वा ।।

१६१ ग्रासार्थमुर्वराखण्डाः केचिदाधीकृता मम ।
कुटुम्बं नु सुखं किं स्यादन्तरा गृहमेधिनम् ।।

१६२ किञ्च मे पितरौ जीनौ मामकागमनावधि ।
निरीक्षमाणौ मां पुत्रशोकार्तौ तु दिवानिशम् ।।

१६३ विजहत्कवलौ दुःखादजहद्बाष्पलोचनौ ।
तन्वीभूततनू चास्तां खट्वैकशरणागतौ ।।

१६४ तस्मान्मया हि गन्तव्यं मातापितृदिदृक्षुणा ।
अनुमन्यस्व मां तूर्णं धर्माधर्मविवेकिनि ! ।।

१६५ उद्यत्काङ्क्षाशतोत्कण्ठाकुलं भोगैर्न तृप्यति ।
वह्नितप्तमयःपिण्डमुदकैरिव मानसम् ।।

१६६ तस्माज्जिगमिषाम्येकं नो व्याजं दर्शयाम्यहम् ।
भोगेभ्योऽवधिशून्येभ्यो जुगुप्सित इति प्रिये ।।

१६७ धर्मेण चानुरागेण रत्या त्वय्येव रज्यते ।
चित्तं तथापि मातरपितरौ मे दिदृक्षति ।।

१६८ उपेक्ष्य पितरावत्र वसेयं यदि सुन्दरि ! ।
भ्रमेयं चम्पकामोदोन्मत्तभ्रमरसन्निभः ।।

१६९ भुङ्क्ते यो विषयान् यथामति विना भाव्यर्थसञ्चिन्तनं
वैधेयः कुमतिश्च मानवपशुः कन्दर्पबाणाहतः ।
नूनं नश्यति रौरवे च पतति प्राप्नोति निन्दामसौ
भ्रश्यत्यन्वयगौरवाच्च नियमाल्लक्ष्म्याश्च कीर्तेरपि ।।

१७० एतत्तस्य वचो निशम्य नयनद्वन्द्वे तुषारायितं
धारीभूतमथाश्रुनिर्झरितमूर्मीभूतमुल्लोमितम् ।
प्रातःफुल्लसरोजसुन्दरदृशस्तस्याः क्रमान्निर्गल–
त्कस्तूरीरचनाविलोपि समभूद्वक्षोजकुम्भद्वये ।।

१७१ तदा स गन्धर्वविभुर्वरूथिनी–
मुखाम्बुजं वक्षसि सङ्गमय्य ।
उन्नम्य चाश्रूणि पुनर्नखाग्रै–
र्निवारयन्मन्दमिदं जगाद ।।

१७२ धीरा त्वं किमु साम्प्रतं नु तव शुक् ? दिव्याङ्गना नैव किं
प्राज्ञाः? किं नियतो वियोग उत वा योगो? न कुर्वन्ति किम् ।
कर्तव्यानि? जना न यान्ति विमु वा नायान्ति रक्ता? गमात्
स्नेहस्तृट्यति किं ? पदे किमु दिते मोक्तुं प्रयाणं प्रिये ।।

१७३ आमूलचूडं मुनिपुङ्गवो मामबोधयत्तां पदलेपविद्याम् ।
आयामि कान्ते ! समये च यामि मुञ्चामि न त्वां
करणैस्त्रिभिश्च ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१७४ इत्थं स कान्तामुपलाल्य तस्माद्ययौ यथेच्छं कपटद्विजेन्द्रः ।
ऋणानुबन्धापगमे त्यजन्ति दारास्सुता वित्तमथासवोऽपि ।।

१७५ इति ललितमनोज्ञं पेद्नार्यस्य काव्यं
सरसविबुधवाचाऽनूदितं शेषनाम्ना ।
सहृदयविबुधौघो 'निर्जरीसङ्गमा'ख्यं
रसयतु च तृतीयं सर्गमुद्यद्रसाढ्यम् ।।

इति श्रीकुण्टिमद्दि श्रीनिवासाचार्यस्य पण्डितप्रकाण्डस्य पौत्रेण रङ्गाचार्यस्य पुत्रेण शेषशर्मणा विरचिते संस्कृत मनुसम्भवमहाकाव्ये निर्जरीसङ्गमो नाम तृतीयः सर्गः ।।

———

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुसम्भवः

चतुर्थः सर्गः

१ संयोगकाले कपटद्विजेन्द्रो निमीलनं लोचनयोर्ययाचे ।
वरूथिनीं कैतवभङ्गभीत्या तं चानुमेने ललनाऽनुरक्ता ।।

२ अभ्यर्थना सा रतिपारवश्यात्पफाल यत्नेन विनाऽपि तस्याः ।
सा विप्ररूपाङ्कितमानसाऽधाद्गन्धर्वतेजोमहितं तु गर्भम् ।।

३ पृथूबभूवोदरमायताक्ष्या लोलुप्यमानत्रिवलि क्रमेण ।
मासोऽष्टमोऽगान्नवमस्तथैव समाययौ वैजननस्तदानीम् ।।

४ विराजयन्ती द्रुहिणाण्डगेहं दीपायितात्मीयशरीरकान्त्या ।
दूरस्थपञ्चग्रहभानुयुक्ते लग्ने शुभे पुत्रमसूत कान्ता ।।

५ देवाधिनाथस्तुतिपात्रपुत्रं जेजीयतामित्यवदन् जनौघाः ।
अवाकिरन्नन्दनपारिजातमन्दारसूनाञ्जलिभिश्च देवाः ।।

६ प्रम्लापयन्तं शशिवह्निसूर्यनक्षत्रकान्तीर्निजदेहरुच्या ।
स्वरोचिनाम्नाऽजुहुवुस्तनानीं तत्रत्यवाचंयमिनः कुमारम् ।।

७ तपस्विनिर्वर्तितजातकर्मा तैश्चोपनीतस्समयानुकूलम् ।
नानास्त्रविद्याकृतहस्त एष वेदार्थवेदी निपुणो बभूव ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८ गोणीघातं मुष्टिभिर्गोत्रशैलान् प्राहत्याऽसीच्चूर्णयन्
यौवनेऽसौ ॥
व्यामग्राह्यं वृक्षमेकैकखड्गाघातं छिन्दंश्चैकमेकं जजृम्भे ॥

९ धावन्नासीद्वायुधावं धरित्रीं
भूयो भूयः कम्पयन् दुर्निवारः ।
आजानेयारोहणे साम्पराये
निर्द्वन्द्वस्सन् राजते स्म स्वरोचिः ॥

१० वेदण्डशुण्डसन्निभकोदण्डनिनादपूरितदिगन्तः ।
भिन्ते स्म गण्डशैलान् सव्यापरकरविमुक्तशरनिचयैः ॥

११ मन्दरभूधरसानौ सुरशिल्पिविनिर्मिते नगरे ।
विततातविकचमूसंवृते धरित्रीधुरन्धरे तस्मिन् ॥

१२ करकाचिटपटरवमनुकुर्वज्जलमुग्भयङ्करा वृष्टिः ।
झंझामारुतमुखरितदरीबिला जातु निशि नगेऽवर्षत् ॥

१३ अविरलविगलत्सलिलप्रस्रवणनिनादनिबिडसानुं सः ।
केकीकुलकेकाकुलमारुक्षन्तं प्रगे नगं द्रष्टुम् ॥

१४ आरुह्य तत्र कतिपयहितनरपरिवेष्टितस्सुखं तस्थौ ।
शशिकान्तवेदिकायां कुटजवनीपवननृत्यदलकालिः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१५ द्वीपिनखान् कस्तूरीं मृगमदमपि मधु च सारफलनिचयम् ।
चित्रगरुत्पत्रयुतांश्चापानादाय शबरवर एकः ॥

१६ निटलतलघटितपाणिर्युगान्तजीमूतपटलसङ्काशम् ।
कैलासशैलकटकालङ्कारवनीं प्रदर्शयन् जगदे ॥

१७ भूदार ! रजतभूधरनिकटे तां पश्य कालमेघनिभाम् ।
मदमत्तकलभसन्निभभूदारसमूहदन्तुरामटवीम् ॥

१८ कण्डूयन्तस्त्रिकं स्वं धरणिरुहवरान् घोणिनः पातयन्ति
स्वैरं खादन्ति लालापतितपटपटाकारिदंष्ट्राग्निवंशान् ।
कर्णं दत्वा पिपीलीचिटपटनिनदं काममाकर्ण्य दंष्ट्रा-
घातं हत्वा निरस्यन्त्यनवनतसटं नन्वमी वेणुगुच्छान् ॥

१९ खदिराङ्गारनिभेन लोचनयुगेनान्योन्यमालोकयं-
त्यनुधावन्त्यधिरोढुमुत्सुकतया मत्ता वराहा मिथः ।
हरिदश्वाऽऽतपतापतप्तदिवसे वेशन्तमग्ना अमी
कलयन्ते च निषद्वरं बुडबुडध्वानोल्लसद्बुद्बुदम् ॥

२० किं वा वच्मि बलं तदीयमतुलं पोत्रेण राजन्नमी
त्वक्सारान्नमयन्ति बल्वजसमं फेनायमाननाः ।
साकं तत्कणिशैश्चरन्ति च सुखं तत्कोटिगाऽऽशुव्रजं
नूनं सूकरडिम्भका मदकलाश्शुण्डाविहीना गजाः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२१ तद्घातुकानामपि तैललेपः कुन्तादिकानां ननु मास्तु राजन् ।
शूलाकृतात्तत्पललाद्घृतं हि नूनं स्रवत्यग्निमुखेऽतिमात्रम् ॥

२२ न प्रेषणीया मृगदंशका वा नैवास्त्रपातेन च कार्यमस्ति ।
ऋश्याश्छुरीपातनिबर्हणार्हा मज्जत्खुराः पङ्किलभूमिभागे ॥

२३ त्रिचतुरशाखविषाणास्सारा बहुलाश्च पीवराः पृषताः ।
द्रुततरपदविन्यासं न सहन्ते शृङ्गभारतः कच्चित् ॥

२४ व्याधकृतप्रतिबिम्बान् शूकाबहुलान् प्रतीपरङ्कुधिया ।
घर्षणलग्नविषाणा रुरवः कृट्ष्वा नयन्ति गहनानि ॥

२५ अमी पृष्ठैः पुष्टैर्ननु ककुदपोषं बलयुताः
यमीभूताः श्यामा न खलु विरमन्त्यत्र रुरवः ।
नियुद्ध्यन्तो दृट्ष्वा मनुजमपि शङ्काविरहिताः
समीकादेतेषां मनुजप ! कियान् रोषगरिमा ! ॥

२६ श्येनेन दण्डेन वनं प्रविश्य पलाशिसन्ताडनमात्रतोऽपि ।
कण्डोलपूर्त्यै प्रपतन्ति नूनमण्डोद्भवाः किं बहुभिर्वचोभिः ॥

२७ अतिशयितदीर्घविग्रहगिरिकादोधाविनिर्मितैरवटैः ।
अटवीतलमखिलं ननु तितवुरिवाभाति वसुमतीनाथ ! ॥

२८ इत्थं वदति च शबरे मृगयास्यन्मानसोऽद्रिशिखरात्सः ।
अनिमिषतरुणीतनयोऽवतीर्य नगरं जगाम तरसा स्वम् ॥

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२९ गत्वा च नगरं दृष्ट्वा च कक्ष्यान्तरशालान्तरेषु क्व-
चित्स्तोमीभूतलम्बमानहस्तत्राणसङ्क्रमत्स्नेहपलल-
खण्डमण्डितद्राघिष्ठवंशदण्डेषु अग्रनिबद्धबर्हिबर्हविराज-
मानरज्जुसन्दानितान् प्रकम्पत्कुक्षिबम्भ्रम्यमाणान्; क्व-
चिच्चापहसितशार्दूलकुटिलनखकोटिपाटवत्रोटीपुटविदार्य-
माणचरणनखराङ्कुरगृहीतचटकसरटादिजन्तुकलेबरान् ;
क्वचिदपिप्रत्यहप्रवृद्धादरं मृगयुसमयसमर्प्यमाणग्रासग्रसन-
विलासानवधीर्य सरभसं परिभ्रम्य पतत्रसमीकरणव्यग्रान्;
कुत्रचित्कालातिक्रमणसमुज्जृम्भितक्षुधाक्षोभनिर्यद्विरावं
पञ्जरस्थितकीरशारिकापारावतादिकलरवाकर्णनपुनःपुनः
परिवर्तितकन्धरान्, बद्धनयनबन्धनान्, उत्प्लुत्योत्प्लुत्य
निजाधारयष्टिसङ्घृष्यमाणपक्षच्छदं भ्रामंभ्रामं ततो जो-
षमास्थितान् ; क्वाऽप्यतिमात्रग्रसनमद सामिनिमीलि-
ताक्षमुत्सूनोरःस्थलप्रान्तं निद्रालुतयैकत्रावस्थितान् नाना-
विधश्येनसमुदायान् ; अपि च सुवर्णवर्णैरतिमात्रप्रमाणै-
र्गलपट्टिकाभिरानद्धैः कण्ठैर्भासमानान्; हरिद्राजलस्ना-
पितान्; बद्धांश्च गलगलायमानसौवर्णशृङ्खलाभिश्शङ्कुपु
विधूयमानशरीरान्; उत्क्षिप्योत्क्षिप्य नकुलमुखदीर्घस्व-
मुखानि बहिराघ्राय मन्दुराबद्धमेण्डेभ्य आकुञ्च्य निगूहित
निजतनूर्जृम्भयतः ऊङ्कृत्य भुवनमग्रपादैरुत्खनतः, वियति
सर्वतः उत्पततः मेघगम्भीरघर्घरारवेण, वमदङ्गारैर्नयन-
गोलकैः पश्यतो भापयतः, विवृतवदनगह्वरविलम्बि-
जिह्वापल्लवानां क्रूरतरदन्तकोटिकान्तिकलापैः कोरकस्त-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बकयोगमापादयतः, वलग्नतानवादिव अप्राप्तोदराणां नितान्तग्रस्तकीलापललजालग्रामानां स्थित्येवोत्सूनानामिव कटितटेभ्यः विशङ्कटानामुरस्थलांसदेशानां सौभाग्यमालोक्य मुदितानां स्वपालकानां प्रशंसावचनानि श्रोतुमिव दत्त-कर्णान्, रजतगण्डोपलदर्श दर्शनीयान् गण्डभैरवपूजातुरङ्ग-पोषं पुष्टान्, विश्वकद्रूंश्च विलोक्य तेषां प्रशस्तान् निश्चित्य तांस्तानानेतुं निर्दिश्य स्वयमपि स्वरोचिराखेटकोचितपरि-पाट्या सज्जीवभूव ।

३० पीतां मुक्ताखचितकविकां क्षौमपल्याणमुद्य-
च्छृङ्गं चापं विशिखनिचयं दीप्यमानं निषङ्गम् ।
शस्त्रीं शातां फलकसहितं हैममुष्टिं च खड्गं
कश्चिद्राज्ञस्सविधमनयत्तेजितांश्चापि कुन्तान् ।।

३१ चित्रगरुत्पत्रशिरोभूषणरत्नमयनिटलपट्टयुतम् ।
गन्धवहबान्धवं नृपनिकटं निन्ये च सैन्धवं कञ्चित् ।।

३२ अभिनन्द्य तमानीतं रयधिक्कृतपवनवाहमदवेगम् ।
आरुह्य वाजिनमगान्मुदितोत्सुकसहृदयैस्स मनुजेन्द्रः ।।

३३ केशैस्संयमितैर्मनोज्ञललितोष्णीषैश्च चण्डातकै-
श्शस्त्रीगर्भलसत्कटीतटधटीरत्नाञ्चितैर्मुष्टिभिः ।
पृथ्वाभीलभुजोपलालनकलाप्रोत्साहितैः पत्त्रिभि-
र्दीप्ता राजकुमारका नरपतेरुत्काः पुरो निर्ययुः ।।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

३४ दरशिथिलितबन्धाः कुक्कुरा लङ्घमाना
उपरि सपदि नूनं दिग्गजान् पातयेयुः ।
अपि वियति खगेन्द्रं डीयमानं समीक्ष्याऽऽ
पतनमनुसरेयुश्छायया साकमुर्व्याम् ।।

३५ अपि किटिदनुजं वा गन्धमाघ्राय ताले
द्रुततरमनुयान्तो नन्वमी वारयेयुः ।
रुधिरपलजिघत्साप्रेरिता दन्तकूटैः
स्थविरकमठपृष्ठं निर्दयं दारयेयुः ।।

३६ इति तदीयपराक्रमशंसिभि–
र्निगलबन्धितकन्धरकुक्कुटाः ।
रुरुचिरे धरणीधरकन्दरा
भरितभेरवपाटितदिक्तटाः ।।

३७ शितनखवज्रमुष्टिपवनात्मजभैरवघोणिघातिनः
कुवलयपुण्डरीकरजताचलहल्लकचम्पकाम्बुदाः ।
अतिजवजाङ्घिकोन्मदकपोतकुरङ्गतुरङ्गखेचरा
इति बहुनामकांश्च मृगयाकुशलान् परिगृह्य लुब्धकाः ।।

३८ कटिसन्नद्धधटीसुवंशजधनुःकोदण्डकोशादिभि
र्निटलावद्धपिशङ्गकर्कशकचैः कायैर्घनश्यामलैः ।
असिपुत्रीसमलङ्कृतैः कटितटैरारज्यमाना भृशं
निरगच्छन् शरवागुरायुतकराः कोलाहलध्वानिनः ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३९ शरं प्रयुञ्जे न तिरोहितस्सन्
सत्यापयामि क्षितिनाथ! नूनम् ।
वधोद्यतं व्यग्रसटं किटीन्द्रं
प्रासैकघातं ननु संहरेयम् ।।

४० संक्षोभयन्तं गहनं गजेन्द्रं
कर्णे गृहीत्वा वशमानयेयम् ।
भयेन धावद्गवयं हठादा-
रोहन्निहन्यां दृढमुष्टिनैव ।।

४१ जोषं शयानन्तु झरीनिकुञ्जे
शब्दायमानं ननु चित्रकायम् ।
बलेन सम्पीडच निपातयेयं
सत्यं शपे देव! भवत्पदाभ्याम् ।।

४२ का वार्तेतरदुर्बलजन्तूनां सङ्गरं कुर्मः ।
नैवाऽखर्वाद्गर्वात् ब्रूमो वयमिति प्रतस्थिरे व्याधाः ।।

४३ श्येनान्मुखरितकिङ्किणि डयमानान् पञ्जशाखकवचेभ्यः ।
क्षुधितान्निगृह्य निरगुश्शशादनान् दण्डपाणयो व्याधाः ।।

४४ गत्वैवं सपरिच्छदं तदनु तेऽपश्यन् वने शाद्वला-
नाशाव्याप्ततटिद्विलोलनयनत्विड्जालरोचिष्णुभिः ।
एणीकोमलपल्लवाभरसना लेलिह्यमानाङ्गकं-
स्सारङ्गैर्दयितानुकूलवलनैः स्वैरं समासेवितान् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४५ भूदारै रशनायितैर्नखमुखैर्जग्धुं च तत्पुत्तिकाः
ख्यातेभ्यो बहिरागतान्विपधरान्नाकुभ्य आक्रम्य च ।
न्यङ्कूनां ग्रसतां निगृह्य तृणवच्चोच्चावचं धावतां
धूलीभिर्जनितैः खुरैः परिवृतान् गण्डोपलानां चयान् ।।

४६ नीलप्रस्थरनिष्ठुरत्वजनिताहङ्कारनिर्वापण-
प्राज्ञशृङ्गयुगीभयङ्करतरान् कालायसप्रक्रियान् ।
अश्रौषुश्शबरा निरुध्य च मिथः पास्पर्ध्यमानान्वने
शृङ्गाशृङ्गि घणङ्घणोन्मुखरितप्रस्थान् लुलायव्रजान् ।।

४७ काल्यासङ्गमने मिथोऽनुसरतां माद्यद्वराहीर्मदो-
न्मत्तानां पुरतः प्रयाप्य शिशुकान् पश्चात्तरक्षन् वृकान् ।
क्रोडापत्यजिघत्सया नु चरतो द्राग्धावयित्वा मुहुः
कोलानां विरुतैर्वनानि भरितान्यालोकयांचक्रिरे ।।

४८ पीत्वा जग्ध्वा नरास्रं पललमपि मुहुश्चाटतां कापथेषु
व्याघ्राणां गोपमन्त्रैरवशमुखतया त्यक्तपानाशनानाम् ।
बन्धत्यागे गतानां झरमथ शबरैराहतानां शितास्त्रै-
र्वान्तास्राणां निनादैर्मुखरितमटवीप्रान्तमीक्षाम्बभूवुः ।।

४९ जग्ध्वा ग्रासमुपेत्य चात्मनिलयं व्याधैः पुरा योजिते-
पून्माधेषु नियन्त्रिताग्रिमपदामाकृष्य तान् कानने ।
यातानामथ गन्तुमक्षमतया पादान्व्यधादून्वता-
मृश्यनां विरुतैर्वनानि भरितान्यालोकयाञ्चक्रिरे ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५० शैलोरभ्रकवोष्णकण्ठरुधिरासाराणि पीत्वा सुखं
शार्दूलेषु गतेषु नादमुखरैः कीर्णानि दंशव्रजैः ।
तन्मांसानि तु पूतिगन्धबहुलान्यत्तुं पतद्भिर्मुहुः
कान्ताराणि विहङ्गमैर्ददृशिरे सान्द्राणि कङ्कादिभिः ।।

५१ गोकर्णस्यवहं निशातदशनैर्व्यग्रे च सन्दंशने
कस्मिंश्चिन्मृगदंशने पतिततन्मांसाशनेऽन्येषु च ।
गोकर्ण शुनकान् प्रतार्य निखिलान् याते द्रुतं तत्पदा-
घातैर्भूपतितांस्तरून् ददृशिरे प्रचीनदर्शं वने ।।

५२ शुण्डादण्डैरिभानां मदकलकरिणीसङ्गतानां समूहै-
रन्योन्याहारदित्सानमितयवफलोदग्रशृङ्गैस्समन्तात् ।
भिन्नैस्त्वक्सारवारैर्दुरधिगमपथोच्चावचान् दावभागान्
व्याधा ईक्षाम्बभूवुर्वनमृगमृगयाकौतुकाकृष्टचित्ताः ।।

५३ निरीक्ष्य च हर्षोत्कर्षेणैकत्र सङ्कटप्रदेशे वागुरादुर्गन्धमाघ्राय जन्तुर्नाभ्येतीति पांसूनुत्पावयित्वा सन्नाहयित्वा च वागुरां वातानुगुणमाबध्य च यवनिकाः नियम्य कतिचन तत्र तत्र वृक्षान्तरितान् संहननाय यवनिका उत्पाट्य दिधाविषूणां मृगाणां पश्चाच्च तेषां सविश्वकद्रून् वागुरिकांश्च स्थातुमाज्ञापयित्वा आदिश्य सानुमनु कृतपुंखान् सर्वतश्चाखेटकान्, मृगाणां निर्गमनाय विस्रम्भेण हरिच्छदच्छटावृतशिरःकोटिधनुष्कोटीन्, जाङ्घिकनिरीक्षणपरानादिश्यापमार्गान् पिधातुमसिधेनुकाखण्डितशूकबहुलविटपनिवहैः;

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वयञ्च क्वचित्पदगः क्वचिच्च हयगस्सन् सर्वगो भवन् पणवमृदङ्गदुन्दुभिप्रमुखानानद्धान् नादयित्वा शब्दापयित्वा च शृङ्गाणि दाहयित्वा च चूर्णनालिका महता रवेण रोदसीं पूरयति स्म चारयति स्म वन्यान् ।

५४ वक्षोभागनिषण्णडिम्भकवलच्छाखामृगीसञ्चयं
वेशन्तोत्थितमत्तकोलनिवहं चाभीलशार्दूलकम् ।
त्रस्तैणाहुतितृप्तदावदहनं सम्भुग्नपुच्छं शनै-
र्गच्छद्भिश्च तरक्षुभिः स्थपुटितं कान्तारमासीत्तदा ॥

५५ मात्सर्यमुत्सार्य विधूय निद्रां
विमुच्य वासं दयितां निरस्य ।
शार्दूलमातङ्गकुरङ्गमुख्य-
तिर्यक्समूहा विपिने दधावुः ॥

५६ उद्यद्यामुनतुङ्गभङ्गविलसद्भूदारवारोत्करं
पश्यन्तो मुमुचुश्शुनो मृगयवो यावत्समारोपयन् ।
काण्डीरा विशिखान् महीपतिमनोमोदाय "कालालयं
नेष्यामो वय" मित्यपास्तशुनकग्रैवेयबन्धा द्रुतम् ॥

५७ आरोपितधनुर्मुक्तनाराचनिभकुक्कुराः ॥
धावंधावं किटीन् गोधान्यरुन्धन् घ्रातवासनाः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५८ श्रुत्वा व्याधनिनादमुन्नतमुखो यूथस्य चाग्रे सरन्
गन्धं जिघ्रति घुर्घुरत्यपि बहुर्धूनोति दंष्ट्रामपि ।
नेदिष्टेषु च कुक्कुरेषु सहसा द्विन्नान् दृणात्युत्पत-
न्नुद्गच्छत्पललं च कर्षति किटिर्दंष्टोऽपि गुल्मेषु तान् ॥

५९ कुन्ताघातबहिर्गतान्त्रनिवहैर्गत्वा च गुल्मान्तरं
पश्चान्नीरसतावशेन च पुनर्गन्तुं पदं न क्षमः ।
भूदारोऽवसरं ददाति न मनागभ्येतुमप्यन्तिकं
स्थित्वा धीरमुदीक्षते च मृगयून् दृष्ट्या दिधक्षन्निव ॥

६० निहतश्वानान्त्रसंवीतदंष्ट्रोऽराजत सूकरः ।
पङ्कालोडनसंलग्नशोणीसन्दोहवत्तदा ॥

६१ वातायुश्शवरान् प्रतार्य शुनकव्यूहं च खे पुप्लुवे
पादैर्भूतलमस्पृशन्निव जवाच्चिच्छेद भूमीपतिः ।
एकेनैव तदा शरेण चतुरो द्राक् संयुतांस्तत्खुरान्
तत्कोदण्डकलाविलासविनुतिव्यग्रे पुलिन्दव्रजे ॥

६२ गोकर्णमेकमिषुणा नृपतिर्जघान
घोणापुटं स च विदार्य बहिर्जगाम ।
धावन् मृगो मरणजातजवातिरेकात्
दूरे पपात विवशो भुवि हीनसत्वः ॥

६३ स्फुरच्चक्षुर्गम्यं क्षितिपतिरहन् कन्दरगतं
शरेण व्याघ्रोऽसौ शरमनु पपातोपरि पुनः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परेणाविद्धोऽपि प्रसभमुपयान्तं तमसिना
दृणाति स्म द्वीपी कुलिशहतभूभृद्वदपतत् ।।

६४ मन्दं गच्छन् सैरभक्रोशमुच्चैः
क्रोशन्नेको गुप्तकल्पं लुलायम् ।
जग्राहान्ये तं बहिस्सञ्चकर्षुः
दृप्तं लुब्धा दण्डघातं च जघ्नुः ।।

६५ तदानीं सन्त्रस्ता यदुपरि निपेतुर्वनमृगा–
स्तदीयास्त्रे मोघीभवति कृतपुंखा अवधिषु ।
शरेणैकेनैकं झडिति मुदितो मानवपति–
र्ददौ तेभ्योऽस्त्रिभ्यस्समभिलषितानर्थनिवहान् ।।

६६ केचित्तदा राज्ञ उपायनार्थं जालात्परिभ्रस्य च धावमानान् ।
हत्वा कलम्बैर्वृककोलभल्लशार्दूलमुख्यान् जगृहुः पुलिन्दाः ।।

६७ शुनकास्सारमेयाश्च शशान् गोधा जिघृक्षवः ।
उन्दुरूंश्च चरन्ति स्म गुल्मवल्लीकसानुषु ।।

६८ गोधां मत्वा कन्दरं प्राप्य कञ्चित्
ध्वान्ते सर्पं क्रूरमाक्रम्य दन्तैः ।
आनीय द्राक् सारमेयो विदंस्त–
ञ्छिन्दन् खिन्नं तोषयामास भूपम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६९ उत्सूनकायश्शुनकोऽग्र्यपादा–
नाकुञ्च्य धैर्येण दरे निलीनम् ।
तृणाय मत्वा निखिलं निनादं
विषाणिगोधां सहसा चकर्ष ।।

७० शूकौघकर्षं स्वतनुं विकर्षन्
गत्वा क्वचिच्छल्यमृगं निलीनम् ।
तल्लोमशब्देन विदन् जघान
वनेचरः कश्चन कुन्तघातम् ।।

७१ तदानीं श्येनाखेटिनस्समेताः करधृतचोदकदण्डाः,
उद्वेजयन्तः प्रान्तेषु पतत्रिणो यथायथमाच्छोदनव्यग्रा बभूवुः ।

७२ व्याधः कश्चन पीनमेचकनिजद्राघिष्ठबाहूपरि
श्येनं पाणितलत्रदुर्ललितमुद्ग्रीवं जहावञ्जसा ।
कालिन्दीतटिनीतरङ्गनलिनीपत्रस्फुरत्कोकस–
ङ्काशं सत्वरधावमानशशके सञ्जातकौतूहलः ।।

७३ सुघटितकटितटघटिकस्सङ्ग्राहनियन्त्रितश्येनः ।
निजघान चिल्लमेकं विशिखेनैकेन कश्चन व्याधः ।।

७४ कुक्कुभमेकं विगलत्किट्टं जग्राह दूरमनुधावन् ।
पत्री कश्चन कञ्चन पतगं गरुता च ताडयामास ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७५ कुञ्जे प्रविष्टमेको बहिरुद्वास्याऽग्रहीत्खगं श्येनः ।
प्रसभं तित्तिरिमन्यश्चुकके सम्मोदयन् धराधीशम् ।।

७६ विचाल्य पिञ्छं गगने पुलिन्दे
कस्मिंश्चिदानर्दति पक्षहत्या ।
कुजाग्रकोयष्टिकवारमेक–
श्शशादनो भूपतितं चकार ।।

७७ एवं विधाय विविधमृगविहङ्गवधं विरता मृगवधा–जीवास्तत्र तत्र परासुचमरसृमरकिरिहरिणरुरुमहिषपृषदंश गोधिकाशशपिशितखण्डान् पत्रपुटेषु सन्धाय, आविध्य गुणेषु, शिक्येष्वावार्य, विन्यस्य वीवधेषु, आध्माय प्रज्वालिते इध्माग्नौ श्मश्रूणि विदाह्य, निशितकरवालैः कृत्तीरुन्मुच्य, छित्वा च कन्धराः, उत्पाट्य शातनखान्, विपुलविग्रहापहसितमहाशैलानां शार्दूलानां कलेबराणि विसृज्य तत्रैव; तत्र तत्र वनान्तरपतितदन्तुरदन्तावलदन्तानादाय, गृहीत्वा दलितकरिकुम्भमुक्तमुक्ताफलानि, परिगृह्य गोरोचनां चमरवालांश्च बर्हिबर्हाणि च वनात्प्रतस्थिरे। तदानीमुद्गिरति खादिराङ्गारांस्तपने शल्यशललक्षतप्रसृमररुधिरधारापूरान् लीढं लीढं प्रशिथिलजिह्वान्, विजृम्भितातपतापेन तृष्णातुरान्, निशितवराहदंष्ट्राघातैरूरुकन्धरापार्श्वनिर्गलच्छोणितान् कौलेयकानाच्छाद्य कर्पटैस्समुन्नतैः, श्रमातिरेकेण समाश्रिततद्रजतगिरिचरमभागशिलातलेषु, चण्डकिरणप्रसारेण पाण्डुरप्रभापूरैर्निस्स-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रज्झरीतटेषु सान्द्रभूरुहवाटिकाः, निखाय अवटानरुणभूमीतलेषु आस्तीर्य सुगन्धिनागिनीपत्राणि, विविच्य समीचीनपलानि निधाय च तत्र कालखण्डहृदयमेदःप्रभृतीनि, आधाय तदुपरि ससाराणि पक्वापक्वानि तिन्त्रिणीफलानि, आपूर्य पाकजलाय निर्मलानि कुरङ्गरुधिराणि, सन्धाय लवणकणसञ्चयं सम्पिधाय पत्रैः, तदुपरि राशीकृत्य शुष्कमाहिषकारीषं, मन्थानमथितार्ग्नि प्राज्वालयन्। ततस्सुपरिपक्वानि प्रज्वलदङ्गारेषूत्तप्य प्रच्योतत्स्नेहं शूलमांसानि परिस्तीर्य परिशुद्धेषु शिलातलेषु, निवेद्य वनदैवताय, मिथो विभज्योपभुज्य, आबध्य विटपिविटपेषु परिशिष्टतन्मृगशिरोलाङ्गूलोरःस्थलानि पीत्वा च शिशिरमधुरसलिलानि विश्रान्तेषु वागुरिकेषु, निलिम्पाङ्गनातनूजोऽपि सहसमागतचतुरौदनिककृतपललफलमूलादिशुचिमधुरमृगयोचिताहारैः सौहित्यमेत्य परिजनरचितपल्लवासनासीनः, वाति च गण्डूषितपुण्डरीकमधुरसासारे निर्झरानिलकिशोरे विश्रान्तिसुखमनुबभूव। तदानीम्;

७८ दिङ्मुखानि तिमिरावकुण्ठनै-
स्संवृतानि न तरां चकाशिरे।
भीकराणि नितरां च कर्णयो-
र्भूरिमायविरुतानि चापतन्॥

७९ वीक्ष्य कुण्डलितचण्डमरीचिं
द्रोणकाकनिचयस्तु रुराव।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उद्धतानिलसमुत्थितधूली–
धूसरस्समभवद्द्रुहिणाण्डः ।।

८० आलोक्य कश्चित्तमनर्थजातं
ससम्भ्रमं भर्त्सितवाहिनीकः ।
अधिज्यचापो घटिताञ्जलिस्सन्
नृपं तदा शाकुनिको जगाद ।।

८१ विश्वम्भराधीश ! मृगव्यलम्पटा
नूनं सुदूरं समुपागता वयम् ।
निर्वर्णय त्वं शकुनानि सूचय-
न्त्यत्याहितं देव ! समीपमागतम् ।।

८२ इति तद्वचः श्रुत्वा ।

८३ विस्फारनादमुखरीकृतदिग्विभाग-
स्तूणाहृतोज्ज्वलशरस्स हयाधिरूढः ।
प्रज्ञ्वत्कटाक्षपरिदीपितकाननान्तः
जज्ञे शुभानि शकुनानि निजे शरीरे ।।

८४ तैश्च प्राणरक्षासंशीतिकरं समीकं सन्निहितमिति,
अन्ततश्च विजयलाभोऽनिवार्य इति च विचिन्त्य
जोषमासीत् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८५ "वनितां विपिनान्तरे विपन्ना-
मबलां मां विधिवञ्चितामनाथाम् ।
परिपालयते" ति दीनकान्ता-
निनदोऽश्रूयत दूरतस्तदानीम् ॥

८६ श्रुत्वा निनादं धरणीविडौजाः
कस्याः किमासीन्ननु केन चेति ।
कारुण्यधारामृदुलान्तरङ्गो
विस्तारिताक्षस्स ददर्श दूरम् ॥

८७ निर्मानुष्ये वनान्ते प्रसृमरविचलद्वेणिकान्त्यन्धकारं
शिञ्जत्पादाङ्गुलीयं प्रचलदुरुकुचं प्रच्यवद्वाष्पधारम् ।
नृत्यल्लोलम्बमालानिवहविशयकृन्नीलदृष्टिप्रसारं
मीनाक्षी काऽपि दीना क्षितिपतिपुरतः प्रादुरासीत्सहिक्का ॥

८८ अधरपल्लवदीधितिसम्मिलद्रदनकान्तिमनोज्ञतमानना ।
निटलसंयुतपाणिरवग्वचो मधुरताधरितामृतमाधुरी ॥

८९ हे राजन्यमहेन्द्र ! हे मणिगणप्रोतासिवाताशन-
प्रारज्यत्कटिचक्र ! हे मुखरशार्ङ्गभीलबाहार्गल ! ।
हे श्वारोहवतंस ! हे निरवधिप्रोद्यत्प्रतापारणे !
हे रुक्माचलकल्प ! हे कवचितव्यूढाङ्ग ! संरक्ष माम् ॥

९० इति निपीय तदीयवचोऽमृतं
सुरसरोजमुखीसुतपुङ्गवः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अभयमाशु ददौ करुणाझरी-
भरितकोमलमानससारसः ।।

९१ सा जगाद च वधूरनुयुक्ता
सादरं नृपतिना स्वमुदन्तम् ।
येन तादृगभवच्च विपत्तिः
स्याच्च येन तु ततश्च विमुक्तिः ।।

९२ उष्णीषेण वपायुतैर्विरचितेनान्त्रैश्च निम्नोन्नतै-
र्मेदःकर्दमगन्धलिप्तवपुषाऽनःकालिकास्पर्धिना ।
वामाविद्धनखाङ्कपाणिनिहितासृक्पूर्णशीर्षास्थिना
भीतिं सञ्जनयंश्च धावयति मां कश्चित्त्रियामाचरः ।।

९३ व्यादीर्घदंष्ट्रः पृथुरक्तनेत्रो
भुग्नांसविन्यस्तनिशातशूलः ।
सालोन्नतो हर्तुमसूंस्त्विरात्रं
नक्तंचरो मामनुयाति मङ्क्षु ।।

९४ अनाथानां विलापा हि श्रोतव्या भवता यतः ।
दुर्बलस्य बलं राजा तद्रक्षा भूभृतां क्रतुः ।।

९५ धर्तुं मां स्वभुजद्वयेन विगलत्केयूररत्नव्रजं
घर्षन्ति स्म तरामहं प्रथमिकाभाजो हि विद्याधराः ।
किञ्चिन्मच्चरणाङ्गदे नदति मामुत्सङ्गमारोपितुं
तांतो मामभिगच्छति स्म सकलांस्त्यक्त्वाऽद्य किं तैः प्रभो! ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

९६ पार्षिपुत्री च कलावतीति
मन्दारविद्याधरकन्यका च ।
विभावसी नाम मदीयसख्यौ
ताभ्यां कदाचिद्गिरिमेकमायाम् ॥

९७ विद्याधरीनितम्बिन्यो दीव्यन्ति सह पल्लवैः ।
यन्नितम्बस्थकुञ्जेषु शोभितेषु च पल्लवैः ॥

९८ समीरेणाहृतो यत्र कुटजानां परीमलः ।
नूनं शिथिलयत्याशु मानं शबरयोषिताम् ॥

९९ आनन्दतुन्दिलो नन्दी वप्रक्रीडासु लोलुपः ।
अभ्रङ्कषान्विषाणाग्रैर्यत्सानून्युत्खनत्यहो ॥

१०० वासन्तीकायमानेभ्यो यदिन्दूपलसानुषु ।
पनीपतन्माकरन्दझरी वहति सर्वदा ॥

१०१ कलधौतगिरौ तस्मिन् पुष्पापचयलालसाः ।
व्यचराम निकुञ्जेषु वयं क्वचन कन्दरे ॥

१०२ कृकलासोपमनैकपीवरसिरासंव्याप्तशुष्काङ्गकं
हृदयश्रोत्रमुखोत्तमाङ्गनिबिडैर्दीर्घैर्जटाश्मश्रुभिः ।
पलितैर्लोमभिरावृतं मुनिवरं कार्पासपुञ्जोपमं
तपसा जीर्णमवेक्ष्य कौतुकरसाक्रान्तान्तरङ्गोऽभवम् ॥

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०३ वदनं क्व वा क्व च विलोचनद्वयं
श्रवणद्वयी क्व च पुनश्च नासिका ।
इति चापलेन तरसा तदाननं
तुहिनोपमानमहमस्पृशं तदा ।।

१०४ समाधिनिष्ठस्स मुनिर्मदीय–
स्पर्शेन भग्नात्मसमाधियोगः ।
उन्मीलिताक्षः परुषाक्षरेण
वमन् स्फुलिङ्गानथ मामवादीत् ।

१०५ हण्डे ! दुर्हृदये ! विहाय सदनं प्राध्वं सुखानि त्यजन्
सूर्यांशुच्छदनीरमारुतमुखैः कालं नयन्नीरसैः ।
ग्रासैर्यो गिरिकन्दरे तपति तं स्पृट्ष्वा हसन्ती पुनः
कुर्वन्ती तपसो विघातमयि! किं प्राप्नोषि? पापे! वद ।।

१०६ गाढपीवरकुचे ! मदमत्ते !
पल्लवैस्सह समानवयस्कैः ।
खेल वा हस रमस्व वा पुनः
स्पर्शनेन जरतां तव किं स्यात् ।।

१०७ अनिवार्यवार्धकाहतमायस्तं मामबाधयो यत्त्वम् ।
पिशिताशिकृतां बाधामनुभवतादिति शशाप कुपितस्सः ।।

१०८ अतृप्यंस्तावतैवाऽसौ कोपावेगचलत्कटः ।
जरन्मुनिर्वेत्रपाणिः पशुघातं जघान माम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०९ शप्ताहतां समालोक्य रुदन्तीं मां दयाकुले ।
सञ्जातमन्यू मे सख्यौ मुनिमेवमवोचताम् ।।

११० हे वाचंयम ! निर्दयः खलु वृथा बालामिमां ताण्डितुं
हस्तस्ते प्रसृतः कथं ? किमकरोदेषा ? शपेयुर्वृथा ।
किं ? किं वा ननु कौटिकोऽसि भगिनी किं वा न ते विद्यते
किं शापैकफलं तपः ? शमधनास्त्वामाहुरेते किमु ? ।।

१११ फणी वृध्वा ग्रहीभूत इव यः प्राप्य वार्धकम् ।
न मुञ्चति मनाक्कोपं न मुनिस्स न तत्तपः ।।

११२ न निन्दायामुद्विजते यः स्तुतौ च न तुष्यति ।
न कुप्यत्यन्यदोषेषु स तपस्वी स वै कृती ।।

११३ अकरिष्याम चूर्णं त्वामभविष्यः परो यदि ।
ब्राह्मणोऽसि ततस्त्रातः किं गौतमगवा त्वया ।।

११४ इति ताभ्यां निन्दितस्सन् दुर्मुनिस्स शशाप ते ।
राजयक्ष्मगदग्रस्ते स्तमित्यम्बुजलोचने ।।

११५ तदानीमेव ते रोगग्रस्ते चास्तां दिनत्रयात् ।
घोरो नक्तञ्चरो राजन् ! कश्चिन्मामनुधावति ।।

११६ ददामि तेऽस्त्रहृदयनाम्नीं विद्यां महीपते ! ।
विना विवक्षां सद्विद्यां गृह्णीयाच्च यतस्ततः ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

११७ स्वायम्भुवाख्यमनवे विद्यामेनां ददौ पुरा ।
पिनाकपाणिस्स ददौ वसिष्ठाय तपस्विने ।।

११८ स तु चित्रायुधाख्याय मम मातामहाय , सः ।
विवाहसमये पित्रे मेऽदान्मह्यमदात्स तु ।।

११९ यशस्करीं शत्रुनाशकरीमेनां गृहाण मत् ।
गृहीत्वा चाविलम्बेन जहि दैत्यं दुरासदम् ।।

१२० इत्युक्तस्स शुचिर्भूत्वा जग्राह च यथाविधि ।
सप्रयोगोपसंहारं सरहस्यं च तां , ततः ।।

१२१ गलगर्तक्रोडनिर्यत्कुहकुहनिनदोद्गाढहासेन कामं
ध्वनयन् भूभृद्गुहालीस्सजलजलदवत्पूरयन् व्योम तन्वा ।
चलितास्यक्रूरदन्तक्षतरदवसनक्षारकीलालवेल्ल–
ज्ज्वलनज्वालाभजिह्वो भयदपृथुगदां भ्रामयत् यातुधानः ।।

१२२ सरभसमुपेत्य ।

१२३ लोकनिकारणोच्चलितरुद्रगलस्थितकालकूटस–
ङ्काशनिशातभीजनकशूलमरीचिभिरन्धकारयन् ।
तं न्यरुणद्धरापतिमुदग्रतदीयपदाग्रघट्टनात्
भूमिधराटवी विकृतिमाप घटट्टविघट्टितेव सा ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१२४ निशाचराभ्रङ्कषकायकान्त्या–
वनीतलं सान्द्रतमिस्रमासीत् ।
सचन्द्रिकञ्चाभवदट्टहास–
निशातदंष्ट्यारुचिभिस्तदानीम् ॥

१२५ जगाद तं नराधिपं विलोक्य मांसभोजनः
"पालाशयाऽवनीतलेऽवलोकता विलोकितः ।
इमां तु बालिकां समं त्वया च सेनया च ते
निगृह्य चापनोदयाम्यरं सुदुस्सहां क्षुधम्" ॥

१२६ इति वदन्;

१२७ दोस्तम्भास्फोटनादाहतपतगकुले तद्वनीशाखिशाखा–
सञ्जाताकीर्णजीर्णच्छदनिवहसमं स्रंसमाने गदां सः ।
भूपाकान्त्या महोल्काभ्रमणमिव भृशं भ्रामयन् द्राङ् निरास्यत्
राज्ञ्यश्वं लङ्घयित्वा स्वमवति गहनं नाशयामास साऽपि ॥

१२८ हतेऽपि गदया भृशं पुनरुपेयुषि क्ष्मापता–
वसङ्कुचितमानसं सुररिपुर्जवेनावधीत् ।
नदत्कनककिङ्किणीनटनजाग्रदुग्रार्भटी–
वदावदगुहान्तरप्रतिभयेन शूलेन तम् ॥

१२९ तच्छूलं धरणीपतिस्सकुलिशाहङ्कारनिर्वापण–
प्रागल्भ्यस्तवनीयबाणनिवहैस्सञ्चूर्णयन्नञ्जसा ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काशश्वेतगरुद्भिरम्बरतलं कल्लोलमालोल्लस-
द्दुग्धाम्भोधिसमं चकार बहुधा चापोच्चलत्पत्रिणाम् ॥

१३० अपि कृत्ति तदीयां ते शरा नालमपोहितुम् ।
दूरेऽपतन् महाभूतमिति त्रस्ता वनेचराः ॥

१३१ उच्छिद्य पाशांस्तु पटापटेति
श्येनानमुञ्चन् प्रसभं किराताः ।
शब्दायमानायसशृङ्खलानि
विमुच्य केचिच्छुनकांश्च तत्यजुः ॥

१३२ स्कन्धोह्यमानानि दभादभेति
केचिन्निरास्यन् पललोत्करांश्च ।
धणाधणेति च्यवमानपत्री-
न्नादाय जग्मुश्च जवेन केचित् ॥

१३३ निवृत्य पश्चाच्च विलोकयन्तो
यथायथं केचन भीतभीताः ।
गतस्य मार्गं परिहृत्य हन्त !
दधावुरद्रिं नगमेकशस्ते ॥

१३४ धावत्यनालोच्य महीपरक्षां
किरातवर्गे कलुषान्तरङ्गे ।
अध्यश्वमेनामुपवेशयित्वा
राजा किरातापशदान् जगाद ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१३५ शस्त्रं नास्ति न वा तनुत्रफलके नो वा शिरस्त्रं रथो
वा नैवास्त्यथ वा न चास्ति तुरगः कश्चित्सहायोऽथ वा ।
दैत्यो मे वशमेति हे वनचरा ! भीतिः कुतः ? साम्प्रतं
किं दैन्यं भवतां ? न तत्र निधनं वा वो निलीनस्थले ।।

१३६ स्वच्छायां लङ्घयेद्वाऽपि भूमिमुत्सृज्य वा चरेत् ।
मन्त्रयेद्वञ्चयित्वा स्वं न मृत्योर्लीयते क्वचित् ।।

१३७ मरणमवार्यं जानन् पापं दूरं परित्यजन् दिवसान् ।
यो वै गमयति पश्चाद्घटयति नूनं विधिश्शुभं तस्य ।।

१३८ बुद्धीन्द्रियक्षोभपयोदवायुः
तरिविपच्छिन्धुविजृम्भणस्य ।
खलोक्तिबाणावलिवज्रवर्म
समीकभूमीस्थलरामरक्षा ।।

१३९ सपत्नगर्वोद्धतिरोगजायु–
र्दम्भोलिराध्यानमहीधरस्य ।
योगादिसंसिद्धिमहानिदान–
मनन्यपान्थस्य सहाध्वनीनः ।।

१४० प्राग्र्यं समेषामपि सद्गुणानां
सुसाधनं चाप्यखिलक्रियाणाम् ।
धैर्यं तदुत्सृज्य भवत्सदृक्षाः
पराजयेयुस्समराङ्गणात्किम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१४१ प्रबोधितास्तेन तथा विलक्षा
वनेचराग्र्या "विजयो मृतिर्वा ।
समं नृपेणे"ति विनिश्चितास्स–
न्नेहुः स्वसैन्यैस्सह सङ्गराय ।।

१४२ इत्थं ते प्रतिनिवृत्त्योज्जृम्भितप्रतापाः क्व वा दनुजः ? कुत्राऽस्तीति दण्डकुन्तासिपरशुपाणयो रयसमुत्थितधूलि-धूसरितधाराधरपथाः पिपीलिकापङ्क्तय इव सकृदेव सुरारिं समावव्रिरे ।

१४३ दोर्दण्डैर्मुद्गराणां भ्रमणपरिचयादंसलैस्सांयुगीना
रोषादारोपयन्तस्त्रिचतुरचरणानेव ते धावमानाः ।
भूमावालीढपादाः श्रुतिनिकटसमाकृष्टशिंजाननार्यः
प्रायुञ्जन् बाणवर्षं दनुजमनु 'फलं भुङ्क्ष्व दुष्टे'ति रुष्टाः ।।

१४४ पललादो मृगदंशो मशकालीमिव निशातदंष्ट्राभिः ।
गृह्णन्नाशुगपङ्क्तिं चचर्वरूक्षेक्षणं ददर्श च तान् ।।

१४५ धावं धावं जनानामुपरि गज इवोन्मत्त आलानमुक्तः
क्षीराम्भोधिं च मन्थन् हरिरिव बहुधा सारयन् बाहुयुग्मम् ।
मर्दं मर्दं च कुप्यच्चमनमहिषवत्सैन्धवानां समूहं
खादं खादं पुलिन्दान् गरुड इव सुधां हर्तुकामः पलाशी ।।

१४६ आवद्धसृक्वा स्फुरदक्षिदंष्ट्रः
श्मश्रुच्यवच्छोणितबिन्दु चर्वन् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

करोटिजालानि पटापटेति
चखाद सैन्यं निखिलं क्षणेन ।।

१४७ तौ ततस्तु सुरसूनुसुरारी
रोषभीषणतया युयुधाते ।
निर्भयं निरुपमं च चिराय
निश्चिकाय नृपतिर्मनसीत्थम् ।।

१४८ जय्य एष भविता न च नाना–
सङ्गराङ्गणहतोऽपि शरास्त्रैः ।
चिन्तयन्निति विना विचिकित्सां
शातकुम्भरसदिग्धशरीरम् ।।

१४९ चण्डभानुखरभानुसदृक्षं
जम्भभेदिशतकोटिसमानम् ।
वज्रभेद्यभिदशातकलम्बं
मत्तशात्रवभयावहकुन्तम् ।।

१५० पद्मरागमणिभासुरचर्म
भूपतिस्स परिगृह्य कराभ्याम् ।
सैन्धवं रणतलादपनीय
तत्र च क्वचिदसङ्कुलदेशे ।।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१५१ स स्थितः क्षणमितश्च ततश्च
प्रस्फुरद्भिरवलोक्य च दृग्भिः ।
ताडयन्निशितपार्ष्णि कशाभि–
र्धावयंश्च दनुजं प्रतिवाहम् ।।

१५२ पर्सुकासु निजघान करस्थ–
प्रासघातमथ दूरमतिष्ठत् ।
अङ्कुशाहतमतङ्गजकल्पं
साट्टहासमसृगार्द्रशरीरम् ।।

१५३ सव्यतश्च नृपतेरपसव्ये
सम्भ्रमन्तमधिपग्रहणाय ।
वञ्चयंश्च दनुजव्यवसायं
मोघयन्नरपतिश्शितबाणैः ।।

१५४ द्रावयन् रुधिरपूरमनन्तं
दानवो ग्रहयते ननु यावत्
खण्डयां नृपतिरास तदानीं
पञ्चशाखमसिना निशितेन ।।

१५५ खण्डितोऽपि स हिरुक् भयलेशं
पार्ष्णिना तुरगमाशु जघान ।
भुग्नपूर्वचरणोऽथ पदानि
पञ्चषाणि जवनोऽपि कथञ्चित् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१५६ विन्यसन् क्षणमिरम्मदकम्पं
तारकापथगते त्रिदशानाम् ।
सम्भ्रेण परिपश्यति वर्गे
क्वापि चान्तरदधादथ धावन्

१५७ ग्रीवां मिथस्स नृपतिस्तुरगस्य मन्द–
मास्फालयन् मुखगतानपि घर्मबिन्दून् ।
उन्मृज्य चाटुवचनैरुपलाल्य चापि
घोणाविनिस्सृतकवोष्णसमीरणं तम् ।।

१५८ फूत्कारघोरनिनदालसवाजिराजं
सञ्चार्य किञ्चिदिव मन्दमितस्ततोऽपि ।
बाधामपोह्य च निरीक्ष्य निशाचरस्य
यत्नं सपत्नहननाय कृतोद्यमस्य ।।

१५९ भूमीः क्षणमतिष्ठतवृक्षमूले
भूमीरुहं कमपि मुष्टिगृहीतकाण्डम् ।
उत्पाटयन्तमवलोक्य हठादुपेत्य
शिञ्जानकिङ्किणिधनुःप्रविमुक्तकाण्डैः ।।

१६० आपुङ्खदानवकठोरशरीरमग्नै–
र्दैत्यं तदीयकृषितो विरमय्य योद्धुम् ।
स्वीयाभिमुख्यकलितं विरचय्य तस्मिन्
व्यग्रे शिलानिचयसङ्ग्रहणाय वाहम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१६१ पार्श्वद्वयोच्चलितशोणदुकूलपक्षं
ताक्ष्यं तिलिप्समिव दुर्दनुजं जिघृक्षुम् ।
उत्क्षिप्तपूर्वचरणं समचूचुदच्च
प्रायुङ्क्त घोरविशिखान् परिघं च कुन्तम् ।।

१६२ निस्त्रिंशमप्यसुरमैष्ट न तैर्विजेतुं
रुष्टश्च तेन गुपितो धरणीतलेन्द्रः ।
नेतुं कृतान्तसदनं दनुजं महान्त-
माग्नेयमस्त्रमधिरोपयति स्म चापे ।।

१६३ तेनाहतस्सपदि पावककीलमाला-
व्याप्ताखिलाङ्गकनिशाचरचक्रवर्ती ।
तत्याज दारुणतनुं दिवि सम्भ्रमेण
पश्यत्सु किम्पुरुषकिन्नरखेचरेषु ।।

१६४ सललिततनुशोभाधिक्कृताष्टापदाभो
नवकिसलयराजद्दन्तवासोऽभिरामः ।
मणिखचितकिरीटश्चारुगन्धर्वरूपो
नयनविषय आसीद्व्योमयानावतीर्णः ।।

१६१ अमरीभूतं गगनादवतीर्णमवाकिरन् कुमुदैः ।
नवनवगन्धैरमरास्सुरसुरन्दर्यश्च नर्तनं चक्रुः ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१६६ श्रेपेद्दनाख्यकविराड्रचिते च काव्ये
श्रीशेषशर्मकविना परिवर्तिते च ।
सर्गस्समाप्तिमगमद्रुचिरस्तुरीयो
गन्धर्वशापपरिवर्जननामकोऽयम् ॥

इति श्रीकुण्टिमद्दि श्रीनिवासाचार्यस्य पण्डितप्रकाण्डस्य
पौत्रेण रङ्गाचार्यस्य पुत्रेण शेषशर्मणा विरचिते संस्कृत
मनुसम्भवमहाकाव्ये गन्धर्वशापपरिवर्जनं नाम
तुरीयः सर्गः ॥

———

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुसम्भवः

पञ्चमः सर्गः

१ तदनु स तुरगावतीर्णमेनं
स्वतनुविलोकनविस्मितं नरेन्द्रम् ।
सललितमुपगूह्य हारहीर–
द्विगुणितदन्तरुचिर्मुदा जगाद ।।

२ भो जैवातृक ! ते च तावकभुजासंरक्षितानां नृणां
भद्रं किं ? किमु बान्धवाश्च भवतस्सर्वेऽपि सानामयाः ? ।
धन्योऽहं तव दर्शनेन दुरितं ध्वस्तं समस्तं च मे
नान्योऽहं तव मापुलात्सुविदितश्चेन्दीवराक्षाख्यया ।।

३ एषा पङ्कजनयना मम दुहिता कस्यचिन्मुनेश्शापात् ।
भूत्वा पलाशनोऽहं पापोऽद्रुह्यं च हन्त तदसुभ्यः ।।

४ वदतीत्थं गन्धर्वे मनोरमा तूर्णमेत्य तत्पदयोः ।
प्रण्यपतत्सोऽपि शिरस्साश्रु सकरुणं तदीयमाजिघ्रे ।।

५ ततो विलक्षस्स वरूथिनीसुतोऽ
नुयुङ्क्त तं "त्वां ननु ! कः ? कुतो नु ।
शशाप ? तं श्रावय" चेति राज्ञा
पृष्टस्स गन्धर्वपतिर्जगाद ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६ अस्त्युल्लोलयशःपुरन्ध्रिरवनौ गन्धर्ववंशोद्भवो
यो नाम्ना नलनाभ इत्यभिनुतोऽहं तस्य सूनुः क्वचित् ।
अयुर्वेदमहर्दिवं न निमिषन् शास्तीति शिष्यावलिं
श्रुत्वा तद्ग्रहणेच्छया समगमं तं ब्रह्ममित्राभिधम् ॥

७ ब्रह्मंस्तव शिष्यैस्सह शाधि कृतार्थय च मामिति सभक्ति ।
पृष्टस्स मुनिः प्रणतं जगद मां परिहसन्नेवम् ॥

८ विटनटगायकगाणिकाकुटिलवचस्सीथुपायिनां श्रवसोः ।
शास्त्रमिदमरुचिरं नः किं छिन्नमपाठनात्तवाङ्ग! वद ॥

९ इति वदति नाहमेवंविधो महात्मन्! भवादृशैर्विबुधैः ।
अनुशिष्टः क्रमशोऽहं मामूरीकुरु च शाधि चेत्यवदम् ॥

१० तव राज्यरमामदसंसक्तस्य परिग्रहात्तु शिष्यतया ।
अन्यन्मौढ्यं किं वा ? मा कोपय मामितश्चलेत्यवदत् ॥

११ स्थगयन्नुच्चावचतद्वचनजनितकोपदहनसन्तापम् ।
स्मृत्वा गतायुरगदंकारं द्वेष्टीति नीतिमवदं तम् ॥

१२ विश्वस्य 'पाठयसि मा' मिति सर्वमपास्य भैक्ष्यमटितुं किम् ।
शक्यं? मैवं वादीरलं त्वया त्वद्गुरुत्वतश्चेति ॥

१३ कथंकारं विप्रः परुषमवदत् कद्वद इदं
मदोन्मत्तो मत्तोऽपि च पठनपात्राणि किममी ? ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ग्रहीष्याम्येवाहं कथमपि च विद्यामिति भव–
न्मृषान्तेवास्यस्थां निकटभुवि मायामयवपुः ।।

१४ कायग्रहोर्ध्वांगकबालशल्य–
दंष्ट्राजराभिश्च वृषेण साकम् ।
अष्टाङ्गकं वैद्यमथाष्टमासा–
नधीत्य षड्भिश्च रसैस्समेतम् ।।

१५ मायामुन्मुच्य 'वैद्यं सदयमनुगृहाणे' ति सम्प्रार्थ्यमानं
धिक्कारैर्मां निरास्यः खलु कथमपि वा किं न लभ्येत विद्या ?।
आस्था जागर्ति चित्ते यदि निकषशिलागूहनात्किन्नु न स्या–
दुद्वाहः कष्टमुष्टिपच! न किमपि मे छिन्न"मित्यब्रवं तम् ।।

१६ श्रुत्वा तत्कम्पमानाधरमतिविगलद्विस्फुलिङ्गाग्निगोलं
भूयो भूयः प्रनृत्यद्भ्रुकुटि भुजगफूत्कारवातायमानैः ।
निश्वासैः स्वेदबिन्दुस्फुरदलिकतटं पञ्चबाणप्रदाहो–
पक्रान्तत्र्यक्षहालाहलपरुषमहाभीलहुङ्कारनादैः ।।

१७ व्याघूर्णन्नथ रारटद्रदनकं रे! शाम्बरीसंवृतो
विद्यां प्राप्य पुनस्त्वधिक्षिपसि "मां मांसं वपां शोणितम् ।
अश्नन्नासुरतामुपेहि कुटिले" त्याकृश्य कम्पत्करं
गृह्णन् भस्म स कक्षपालनिहितं चाऽवाकिरन्मां जटी ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१८ कुलिशाहत इव विह्वलचेतास्तच्छ्रवणतो मुनीन्द्रस्य ।
पदपल्लवयोरपतं व्यजिज्ञिपं तं सगद्गदैर्वचनैः ।।

१९ भो मौनीन्द्रवतंस! मामकमिदं क्षान्त्वाऽपराधं कृतं
वैधेयत्वविजृम्भणाज्जनमिमं रक्ष प्रसन्नो भव ।
शापान्तं च दयस्व हन्त! रुधिरं मांसं नराणां कथं
वाऽश्नीयां? दुरितं कथन्नु करवै? नैवास्मपत्वं सहे ।।

२० मृद्वीभूतमना मदीयंवचनैरुत्थाप्य मां पाणिक–
ञ्जाताभ्यामवदन्मुनि"र्ननु वृथा मच्छापशूलाहतः ।
केभ्यश्चिद्दिवसेभ्य आत्मतनयामुत्तुं व्रजन् लप्स्यसे
दिव्यास्त्रार्चिभिरावृतस्सुकृतिनः कस्यापि शापच्युतिम् ।।

२१ एवं शापावधिं ज्ञात्वा समारूढतुरङ्गमे ।
मयि गच्छति सप्ताश्वः प्रतीचीशैलमास्थितः ।।

२२ शनैर्मम शिरोबाधा समभून्मदमत्तवत् ।
विवशस्सन् प्रदीपेषु ज्वलत्सु स्वपुरीमगाम् ।।

२३ प्रैषयं प्रेष्यवर्गं च भापयित्वा पुनः पुनः ।
आरात्रिकाग्राहिणीश्च कशाघातैरमारयम् ।।

२४ निशीथिन्यां तदानीं मे कायमामेघमण्डलम् ।
एधाम्बभूवेव राजन्! मुनिशापाभिमर्शनात् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२५ चक्रवालाद्रिपर्यन्तमुच्छूनमिवचाभवत् ।
उत्प्लुतं पद्मभूलोकपर्यन्तमिव पार्थिव! ॥

२६ पाताललोकपर्यन्तं पपातेव महीपते ! ।
सर्वलोकान् जिघत्सुश्च क्षुधा; सप्तसरित्पतीन् ॥

२७ पिपासुरप्युदन्या च दुधूषुः सर्वपर्वतान् ।
मत्तता च शरीरे मे समभून्नरपुङ्गव ! ॥

२८ मया दनुजरूपेण नारीषु च नरेषु च ।
शोकव्याकुलचित्तेषु बालेषु स्थविरेषु च ॥

२९ एकैकेनापराधेन भक्ष्यमाणेषु चैकशः ।
अन्तःपुरं पुरं चापि निर्मक्षिकमभूत्तदा ॥

३० पुरे पितृवनीभूते सीमान्तग्रामवासिनः ।
खादं खादं यथा मारी देशं शून्यमतानिषम् ॥

३१ इत्थं विधिविधानेन यातुधानीभूय धाराधरोत्सेदमतिनि-
शितरोमसंबाधं धूमसमधामं धृतान्त्रदामं चलितकपाल-
कुण्डलं ज्वलितसितदंष्ट्रामण्डलं नागायुतत्राणं मस्तकोत्तुङ्ग-
घोणमनवरतहिंसानुरूपञ्च धृत्वा रूपं, शकलाङ्गसङ्का-
शैरुद्गिरदङ्गारैरपाङ्गैः पिशङ्गैः, पश्यज्जनासुमोचनैश्च
लोचनैः, लम्बमानैश्च धूम्रकेशैः सकलभूतभयावहेन दर्पेण
अत्रत्यानुटजान् प्रति धावं धावं, अगणयन् वटुर्जटीवेति'

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बालःस्थविरो वेति च, खादं खादं पूरयन् पिचण्डं प्रावर्तयम्। तदास्तां तावत्, श्तूयतामिदम् । अपि स्याद्गणना तारकाणां वर्षधाराणां सिकतानां वा; मदीयजठरानलजीर्णजन्तुसन्तानं गणयितुं नालं स्रष्टाऽपि विश्वस्य । एतादृशशापोपकल्पितदनुजभावाविष्टस्य दौष्टचं मे किञ्चिदिव जानन्तः उत्सवालोकनव्याजेनाऽऽपृच्छैव मत्कलत्रं स्वगृहमनयन् तदीयास्सोदराः, अरक्षंश्च तां तत्रैक । इदानीमहं वने विनाऽहारं सुचिराय जातां सुतां कैलासकानने पुष्पापचयाय चरन्तीमालोक्य दयां दूरीकृत्य जठराग्नौ समिधयितुमनुधावं धावमागत्यात्र भवदीयदर्शनेन वृजिनान्मुक्तः प्रकृतिमापन्नः कृतार्थश्च समभवम् ।

३२ उपकारस्यैतस्य प्रतिकर्तुं किन्नु शक्यते कच्चित् ।
शफरात्यायतनयनां दास्यामि सुतां गृहाण दारतया ।।

३३ माविष्णूद्वाहसङ्गीतगायद्गन्धर्वसङ्कुले ।
आयुर्वेदञ्च मत्पुत्र्याः पाणिं गृह्णीष्व मन्दरे ।।

३४ जीर्यत्पन्नगराजभोगचयवद्यत्सानुकोटिव्रजः
कर्षत्यभ्रतलं विमानरचना रारज्यते तन्नगे ।
मत्तानेकपरःजिदुर्गमनिषद्याऽत्यर्करत्नोच्चयै–
र्नूनं निर्जरवल्लभस्य नगरीमत्येति सा मत्पुरी ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३५ इत्थमद्भुतमुदन्तमखण्डं
व्याजहार स निजं नरनाथम् ।
तन्निशम्य स तुतोष नितान्तं
भास्करोऽस्तगिरिशृङ्गमियाय ।।

३६ चक्रं पालयति स्म सर्वजनसम्मोदं व्यतानीत्करै–
राशान्तान् कबलीचकार सकलान्वर्णानिनोऽदीपयत् ।
दीव्यद्राजरुचिं जहार समभूच्छान्तोऽन्ततः "किं फलं
तत्प्वा दैवकृतस्य न" न्विति वदन्नस्तं विरक्तो गतः ।।

३७ सान्ध्यो रागो रुरुचे पराद्रिशिखरे शुकीमुखसमानः ।
राक्षसतनूविलग्नं स्वरोचिवाणाग्निकीलजालमिव ।।

३८ अम्बरमण्टपसीमनि तारा धवला विरेजिरे नितराम् ।
गाढान्धकारभुजगीविनिहितबहुलाण्डविसर इव ।।

३९ चण्डीशचण्डताण्डवसम्भुग्ने भूशताङ्गकरथाङ्गे ।
एकस्मिन् दिव्युद्गतमिव परचक्रं रराज विधुबिम्बम् ।।

४० तमोभुजङ्गी निखिलं प्रपञ्चं
निगीर्य भूयोऽपि च तद्वमन्ती ।
सन्ताडिता मस्तक ओषधीश–
करैरिवोत्सृज्य जगाम दूरम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४१ चन्द्रांशूपलवान्तशीतलजलासारप्रपूरैश्शनैः
चञ्चद्दक्षिणमारुताहतदलत्सौगन्धिकाधूलिभिः ।
मल्लीफुल्लसुमस्रवन्मधुगुडाम्भश्शीकरैर्मिश्रितां
दुग्धाम्भोधितरङ्गमण्डनिवहैर्ज्योत्स्नासुधां शीतलाम् ॥

४२ सुधाकरः स्वीयकरान् प्रसार्य
स्वच्छां समालिप्य मुहुर्मुहुश्च ।
तमोमषीनैल्यमपाकरिष्णुः
ब्रह्माण्डगोलं धवलीचकार ॥

४३ सुधांशुकान्तोपलमण्डपस्थ–
प्रवालशय्यातलसन्निविष्टः ।
राजा निशामिष्टकथानुलापै–
र्गन्धर्वराजेन समं निनाय ॥

४४ आत्मानं सम्परित्यज्य दूरगस्य कलानिधेः ।
वियोगेनेव तरुणी प्राची पाण्डुरतामगात् ॥

४५ उदयाद्रिसभामध्ये दिदीप इव विस्तृतम् ।
शोणमास्तरणं क्षौमं पूर्वसन्ध्यारुणच्छविः ॥

४६ व्याददुः कमलास्यानि मुखरभ्रमराणि च ।
आह्वयन्त्य इवात्यन्तं पद्मिन्यः पद्मबान्धवम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४७ भानूष्मभीत्या प्रथमभ्रष्टास्तारा इवाबभुः ।
तुषारबिन्दवः प्रातर्वातकम्पितशाखिनाम् ॥

४८ कालगुणबद्धदारवरथाङ्गमिव वासवात्मजनिरस्तम् ।
लाक्षारुणं दिदीपे प्राच्यां दिशि रागरक्तरविबिम्बम् ॥

४९ गन्धर्वपतिश्शापाद्विमुक्त इति तत्प्रगे श्रुत्वा ।
तद्बान्धवाश्च सुहृदोऽनुचराश्च समेत्य रागतोऽपश्यन् ॥

५० दृष्ट्वा तानन्गृह्य हर्षविवशो गन्धर्वराजस्तदी-
योपग्राह्यचयान् कटाक्षनिवहैः पश्यन् ययासुः पुरीम् ।
विद्युद्वेगहयं रथं मणिमयं चारुह्य राज्ञा समं
प्रागाद्वेत्रधरेषु तस्य बिरुदानुच्चारयत्सु क्रमात् ॥

५१ जनकमनुसृत्य रत्नस्यन्दनमारुह्य कन्यकाऽपि ययौ ।
मन्दरगमनायेत्थं तेषूत्पतितेषु विष्णुपदसरणौ ॥

५२ आभुग्नैकपदेन दन्तयुगलेनोच्छिद्य मेघान् जलं
शुण्डाग्रेण विकृष्य चापि चकरुर्नागाधिपास्सर्वतः ।
आकर्ण्यार्यमवाजिकण्ठनिनदान् दत्वा श्रवस्सैन्धवा :
उद्विग्नाः खुरकोटिभिश्च बहुधा चख्नुर्वियत्केवलम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५३ शान्तान् केतनमारुताहतिवशात् प्रज्वालयन्वैद्युत-
ज्वालाभिः करदीपदण्डनिवहान् तद्दीपिकाधारिणः ।
प्रोद्यत्तूर्यनिनादभीतहरिणाक्षीणां स्वयंग्राहसं
श्लेषाः खेचरिणां प्रमोदमतुलं विस्तारयाञ्चक्रिरे ।।

५४ गङ्गानदीभङ्गमरालशङ्कां
चक्रुर्नताङ्गीकरचामराणि ।
आमन्दरं चारजताद्रि सेनाः
सैन्याधिनाथा गमयाम्बभूवुः ।।

५५ गजहयरथभटसङ्कुलधूलीपटलावृताभ्रतलम् ।
रेजे कसीसमाञ्जिष्ठोल्लोचमनोज्ञभूपसभकल्पम् ।।

५६ गामं गामं खेचरेन्द्रोऽभ्युपेतै-
र्मान्यैर्युक्तो मध्यदीव्यत्पतङ्गम् ।
अग्रे दृष्ट्वा मन्दराद्रिं स्वरोचिं
प्रावोचत्तं मन्दमिन्दीवराक्षः ।।

५७ जीर्यत्कच्छपराजकर्परगृही चक्षुश्श्रवोराड्वटी-
रेखालङ्करणः सुरासुरविनिर्वृत्तक्रियो यो नगः ।
लब्धाम्भोधिगभीरतापरिचयो मैनाककूलङ्कषो
देवेन्द्राय तुरङ्गकुञ्जरमणीविश्राणने कर्मठः ।।

५८ वैकुण्ठाङ्गदहेम निर्भरवलत्रेत्रङ्कुजङ्घाधिपा-
कर्षोत्पन्नवलीषु सक्तमभवद्यत्त्वस्य भूमीभृतः ।
आद्याप्युज्ज्वलति प्रभालहरिभिः काञ्च्यायते हारति
श्रैवेयत्यवनीपते! धरणिभृल्लालाटपट्टायते ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५९ अन्विष्य वेधा बहुधा न लेभे
त्रय्यां तदन्तेषु च माधवस्य ।
सरोजरेखाङ्कितपादयुग्म–
मेतद्गिरौ भाति समन्ततस्तत् ।।

६० उत्सूनैररुणारुणैश्च नयनप्रान्तैस्तमालच्छद–
च्छायाभी रसनालिभिर्गरलसंसिक्ताभिरालम्बिभिः ।
दीर्घेणोत्थितकृत्तिना च वपुषा शुष्केण माल्येन वा
नेत्रीभूतभुजङ्गराजदुरवस्था सा न विस्मार्यते ।।

६१ अमृतमपायि यज्जलनिधावसकृद्भ्रमता महीभृता
विलमुखपङ्क्तिभिस्त्रिदशभोजनतद्गुणगौरवात्किमु ।
पलितविकारसङ्गतिमपास्य सुखं भजतीव राजते
मृदुलविनीलचञ्चलशिरोजतमालमरीचिभिर्भृशम् ।।

६२ मन्थानाचलघर्षणादपि मृतैर्मुक्तास्सुधासौरभात्
श्वेताः पाण्डुरदुग्धधावनवशाद्यादोगणास्सागरात् ।
ग्रासार्थं बहिरागतास्सहचरन्त्यारण्यकैर्जन्तुभिः
प्रोष्ठीभेकढुलीकुलीरमकरीगण्डूपदोद्रादयः ।।

६३ इत्थं मन्दरमभिवर्णयति गन्धर्वपतौ तद्वर्णनमाकर्णयन्तः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६४ सर्वे चन्दनपङ्कपङ्किलतलं चञ्चत्पताकापटाऽ
पास्ताकांशु च मञ्चकोपरिकुटीवाटीनटन्नर्तकि ।
उद्यद्यौवनकामिनीपरिचलद्वीक्षावलीतोरणं
गन्धर्वाधिपपट्टणं निविविशुर्द्वारप्राघाणे ततः ।।

६५ सामन्तमन्त्रिबान्धवसंश्रितयोधान्निवार्य गन्धर्वः ।
विधुकान्तकान्तिकन्दलकान्तं हर्म्यं न्यवेशयद्भूपम् ।।

६६ निवेशयित्वा च तदनन्तरमन्तःपुरकान्ताकरान्ततन्तन्यमान-
मणिभाजननीराजनमङ्गलमङ्गीकृत्य, सम्भाव्य च प्रिया-
ङ्गनाः, प्रविश्य पुनरप्यास्थानमण्डपं, मतङ्गमङ्किमङ्कण-
मन्दपालमरीचिमाण्डव्यमार्कण्डेयादीनाहूय महामुनीन्,
निश्चित्य विवाहलग्नं, गगनचरजङ्घालकरप्रेषितदिविज-
तरुपत्रलेखामुखेन चित्ररथचित्रायुधचित्रसेनादीन् गन्धर्वान्,
वराहकर्णगजकर्णसुकेतुमाणिभद्रप्रमुखयक्षान्, रेवन्तमुख्यगु-
ह्यकान्, मन्दारप्रभृतिविद्याधरानाहूय सविनयं वित्ताधिपतेः
सम्प्रेष्य विज्ञापनपत्रिकां निजप्रधानमुखेन, आनयामास
नलकूबरम् ; ततः ।

६७ सतीषु गानोन्मुखरासु भूमीबिडौजसो मेचककुन्तलायाः ।
सपीतमुद्वर्तनमङ्गकेषु दधुश्चिरण्ट्योऽनुमताःप्रवृद्धैः ।।

६८ सस्नौ भूमिपतिस्तुषारसलिलैस्सौगन्ध्यपाणिन्धमैः
दृश्यादृश्यवलग्नयौवतकरैरार्वाजतैर्निर्मलैः ।
जीर्यत्पन्नगकञ्चुकोपमपटेनापोह्य पाथःकणा-
नङ्गे पर्यदधात् दुकूलमतुलं निश्वासधाव्यं नवम् ।।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६९ पार्श्वायोजितहल्लकप्रसवयुङ्मौलौ शिरोवेष्टनं
सौवर्णाञ्चलपाटलेन च पटेनावध्य कस्तूरिकाम् ।
मत्तेन्दिन्दिरपारणायितवलद्गन्धानुलिम्पत्तनौ
माणिक्योज्ज्वलदङ्गुलीयकटकग्रैवेयकैर्भूषितः ।।

७० नेदिष्ठस्सुमुहूर्त इत्यनुमता गन्धर्वराजा महा–
मात्या अप्यधिकारिणो गजभटाश्वस्यन्दनेनागताः ।।
जैत्रातोद्यरवैर्विलोक्य च नृपं सौवर्णदूष्यावली–
चञ्चत्केतनदीप्तवासवकरीन्द्रारूढमातेनिरे ।।

७१ आरूढं मदमत्तवासवगजं यान्तं ससैन्यं पुरी–
रथ्यायां समलोकयन्नृपवरं भूपाशतालङ्कृतम् ।
आरुह्याङ्गणवेदिकामणिमयप्रासादवाटीस्तदा
प्रातःफुल्लसहस्रपत्रनयनाश्चन्द्राननाः कौतुकात् ।।

७२ आवृत्य पादौ ननु राजहंसा
न चालयन्त्येष हि कोनुबन्धः ।
ममेति काचित्पदहंसकं द्रा–
ङ्निरस्य गत्वा नृपतिं ददर्श ।।

७३ वृण्वानाः परितः पदाम्बुजयुगं किञ्चिन्न वाचालय–
न्त्येषः को नु ममानुबन्ध इति काचिद्राजहंसावलिम् ।
द्राङ्निर्धूतनिरस्तहंसकतया रुध्वा च गत्वा पपौ
नेत्रान्तैर्मुरजिन्निभं जलधिसंवीतावनीवल्लभम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७४ काचित्पल्लवमप्सरा अनुनयैः कोपेन दूनं समा
धायं धायमुपेत्य राजपदवीमैक्षिष्ट कामोपमम् ।
राजानं तरलैः कटाक्षनिवहैः पश्चादुपेतं विटं
दृष्ट्वा स्विन्नतनुर्बभूव विरता सा सोऽप्यभून्निष्प्रभः ॥

७५ नृत्यन्ती नृत्यशालोपरि धरणिपतिं द्रष्टुकामा समेता
तिष्ठन्ती चन्द्रशालाञ्चलभुवि विकचेन्दीवराक्षी नरेन्द्रम् ।
पश्यन्ती काऽपि हर्षोच्छ्वसिततनुलताच्छिन्नचोली च तूर्णं
स्फीतं वक्षोजकुम्भद्वितयमपि दधौ वैजयन्तीपटेन ॥

७६ वीणावादनतत्परा सरभसं प्राप्ता प्रतोलीं नृपं
पश्यन्ती कुचकुम्भसम्भृतकरा गुच्छार्धमुक्तामणीः ।
संस्कर्तुं तपनीयकोणवलनैराभाति पुष्पायुधाऽऽ
कर्णाकृष्टविमुक्तचम्पकसुमाविध्देव काचिद्वधूः ॥

७७ काचिद्बाला नृपालं कुसुमशरसमं विह्वला वीक्ष्य नोपा
लम्भन्ती द्रष्टुमीष्टे न च निटलतटीप्रच्युतं चित्रकं वा ।
स्वेदोद्गारैर्नवासावरुणरदपटीवीटिसेवाप्रमादा-
ल्लग्नं लेपं स्वभूषामपि परिहसितुं नर्मसख्याहृतं वा ॥

७८ लोलेन्दिन्दिरकुन्तला सपुलकाऽपश्यद्रतान्ताकुला
व्याप्ता घर्मजलेन या तु पदवीपर्यन्तमेत्याधिपम् ।
सा रोमाञ्चयुता सघर्मसलिला तस्थौ यथावस्थितं
नूनं कान्तविलोकनं निधुवनादूनं न वै योषिताम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७९ उत्सार्यानिनपङ्कजालकचयं निह्नुत्य जृम्भां मुखो-
पान्ते कौसुमकन्दुकं निदधती हर्षाश्रुबिन्दून् शनैः ।
अस्यन्ती नखराञ्चलेन च सखीस्कन्धे मनागानता
काचिद्वारवधूर्ददर्श नृपतिं बाष्पार्द्रगण्डस्थला ।।

८० एकस्मिन्नयने कपोलफलके वक्षोजकुम्भे बहि-
र्दृष्टे द्वारतिरोहितार्धसुतनुः काचिच्चिरण्टी नृपम् ।
अद्राक्षीच्च सरस्वतीं श्रियमपि द्रष्टुं तदीयां शिवा-
भागो भागमपास्य शाङ्करमिवायातस्सकौतूहलः ।।

८१ काचित् स्विन्नशरीरसङ्गतपटीरारज्यमानाम्बुजा
भूमीपालवतंसमैक्षत समुद्यत्कौतुका सुन्दरी ।
सर्वाङ्गीणसमुन्मिषन्नयनकञ्जातैः स्फुरद्यौवनं
पश्यन्तीव च निर्निमेषनयनं तं मन्मथाग्रेडितम् ।।

८२ इत्थं द्रवीभूतान्तरङ्गकुरङ्गनयनापाङ्गतरङ्गितसितेतर-
तरलतरदृग्रोचिभिरभङ्गशृङ्गाररसवीचिभिरिव समा-
क्रान्तः, आलम्बितचीनाम्बरप्रालम्बमालिकाचित्रातपत्त्रैः
पत्रावतीर्णैर्दुर्गाधिपतिभिरहम्पूर्विकया वीज्यमानेषु चामरे-
ष्वच्छाच्छकौमुदीगुच्छानुत्पादयत्सु; अन्तिकवैजयन्तिकाप-
टाञ्चलसञ्जनितमारुतोच्चलितनीलालकालकचयेषु उभय-
पार्श्वसमुत्तुङ्गमत्तमातङ्गमदसौरभसङ्गिभृङ्गसङ्घानां भ्रम-
रीभ्रममापादयत्सु ; अङ्गालिप्तसुगन्धियक्षकर्दमे सम्मर्दज-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निततापविशीर्णे परस्पराङ्गसङ्गमेन चूर्णीभूय दिवमभिव्याप्य वितानायमानैः विशृङ्खलनागरकवागारवेषु वन्दिमागधस्तोत्रपाठेषु, पुरुङ्खानुपुरुङ्खवाद्यमानशङ्खभेरीपटहकाहलवेणुवीणादिवादनध्वानेषु, कलमधुरकिन्नरीनिक्वाणमधुरताहारिगायकनिनादेषु अप्सरःकान्तागीयमानलक्ष्मीनारायणकल्याणगीतिकानिस्वनेषु एकीभूय जनसङ्घोत्सारणव्यग्रवेत्रहस्तप्रशस्ततरसाहोनिनादैस्सह जृम्भमाणेषु; जन्येषु मन्दमन्दं परिक्रमत्सुःजङ्गमप्रदीपेष्विव विभ्राजमानमकुटारविन्दरागेषु सामन्तराजेषु सञ्चरत्सुः मन्दगतिबृन्दारकवेदण्डोपर्युद्दण्ड तनुच्छायाकलापे जाम्बूनदीजम्बालायमानैः बहुविधनिनादसन्दोहे हृदयङ्गमहंसादिविहङ्गमरवायमानैःशैवालायमाने च मङ्गलद्रवसन्दोहमध्यदृश्यमानपुण्ड्रेक्षुदण्डाग्रजाग्रत्पालाशपलाशनिकरे ; हल्लकायमानेषु करदीपेषु ; पार्श्वद्वयसमुत्तुङ्गमणिसौधवीथिकारोदोऽन्तराले गन्धगजघटाघनाघनकान्तिधूलिकमगधाश्वप्रवाहे कूलङ्कपनृपतिपथयमुनाह्रदे गगनगङ्गावगाहनाभ्यासवशेन परीवाहितमिव परिभ्राजमाने ; आत्मसमुद्दामतेजोभराद्भीतानि मेरुगिरिशृङ्गाणीव चतुरस्रशोभिस्कन्धलोलुप्यमानतारतारहारेषु केयूरहीरेषु करकङ्कणकुरुविन्दकन्दलेषु कटिकनकमेखलाघटितचारुकरवालमुष्टिमरकतप्रभासु एकीभूय चन्द्रिकाप्रत्यग्रडिण्डीरातिशायिसुसूक्ष्मकञ्चुकधालधल्यपश्यतोहरेषु ; तुषारपिहितरोहणाचल इव नृपकुमारो राजभवनाङ्गणं विवेश । ततस्तत्र ;

८३ कान्ता कदम्बकिसलयकान्तकरावर्ज्यमानकनकघटैः ।
वान्तैस्सुगन्धिसलिलैः स्नात्वाऽपिहत पटेन तनुबिन्दून् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८४ बध्वा हाटकतन्तुभासुरपटीं लिप्त्वा पटीरं तनौ
धृत्वा कुण्डलपारिहार्यकमणीमञ्जीरभूषावलीः ।
फुल्लन्नन्दनपारिजातसुमनोमालावलीभूषिता
सा वैवाहिकवेदिकां प्रियसखीनीता सलज्जाऽविशत् ॥

८५ इन्दीवराक्षः प्रियमन्त्रियुक्तस्तमभ्यगाद्गोत्रभिदा सदृक्षम् ।
वतीर्य नागात्प्रणमन्तमेनं कुमारमाशस्त ततो वरस्सः ॥

८६ विप्राशीर्वादनादैर्मुखरितकुहरं प्राप्य चान्तःपुरान्तः
सम्मान्यारात्रिकादीन् सरसिजनयनार्वजितान्मङ्गलार्थम् ।
पश्यन् सौवर्णकुम्भं मणिमयमुकुरं द्वारकक्ष्यान्तरेषु
स्तम्भद्रम्भातरूणां चलितकचभरस्तालवृन्तत्पलाशैः ॥

८७ मन्दं मन्दं परिक्रम्य गन्धर्वराजमहामात्रेण किम्पुरुषवृषभेण दत्तमालम्ब्य हस्तावलम्बं, पुरोहितब्राह्मणवन्धुपुरन्ध्रीसन्दोहनीरन्ध्रं वैवाहिकक्रियारम्भसम्भारसम्भ्रमद्रम्भादिमरुद्रम्भोरुमधुरमञ्जुलालापकलकलसमाकुलं कौतुकागारं प्रविश्य ;

८८ दीव्यत्कौस्तुभरत्नसन्निभमणीजालप्रभाम्रेडित–
द्योवीथीरविदीधितिं मरकतत्विड्भास्वरे मण्डपे ।
राजद्विद्रुमपादहाटकमहापीठीमुदञ्चद्गतिः
सम्मत्या श्वशुरस्य सोऽधिरुरुहे सर्वसहावल्लभः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८९ भृङ्गारौ देवगवी दधिमधुसंयुक्तमधुरमधुपर्कम् ।
सविधि नभश्चरमुद्गः प्राशयदवनीसुधाशनाधिपतिम् ॥

९० अभ्यर्च्य नारायणतुल्यमेनं
जामातरं सिन्धुसुतासदृक्षाम् ।
ददौ सधारं हुतभुक्समक्षं
तस्मै कुमारीं स मनोरमां ताम् ॥

९१ अनन्तरं हर्षभरालसाङ्गके
वधूवरौ बन्धुजनास्समानयन् ।
समुद्गकैरक्षतराशिपूरितैः
सुसम्भृतः काण्डपटस्य सन्निधिम् ॥

९२ अन्योन्येक्षणलालसे च मिथुने शब्दायमाने शुभ
वादित्रे नमिते तिरस्करिणिकाचेले सुधापाण्डुरे ।
धम्मिल्ले वदने गले स्तनयुगे स्तनयुगे तस्याः क्रमादीक्षिते
क्षीराम्भोधितरङ्गनिर्गतरमेवाब्जाननाऽराजत ॥

९३ स्त्रीभिः काण्डपटे तदा विनमिते गुञ्जन्मणीकङ्कणं
दृष्टे राजमुखे हटाच्च पुरतः कान्तादृशश्चञ्चलाः ।
गत्वा तिर्यगधो निपत्य पुनरप्युत्प्लुत्य साचीकृता
आनायात् स्खलिता भुवौ निपतिता रेजुर्विसारा इव ॥

९४ क्ष्माभृद्दृष्टिमलिम्लुचो नववधूगण्डद्वयीसंभृतं
लावण्यद्रविणं हरंश्च निटलं राजानमालोक्य च ।
स्तेयं भीतिवशेन तद्वसु पुनर्घर्माम्बुमुक्ताफल-
व्याजात्तत्र निधाय चान्तरदधाद्धम्मिल्लकुञ्जान्तरे ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

९५ साशङ्कमेव तस्या दृष्टिर्भूपालदृष्टिमभ्यगमत् ।
शफरीव जह्नुतनयानूतनसलिलप्रवाहमभियान्ती ।।

९६ लुप्यन्मध्यवलित्रयं स्वचरणाग्रेणोत्थिता संभ्रमा-
दूर्ध्वव्याप्तकनीनिका नृपशिरस्यारोपयत्साऽक्षतान् ।
दोःकूलङ्कषनिष्ठुरस्तनयुगीजृम्भायबाहुद्वयी-
केयूरोज्ज्वलरत्नकान्तिनिचये साहोनिनादोल्बणे ।।

९७ चञ्चत्कङ्कणकान्तनाञ्जलिपुटेनाहृत्य वैवाहिका
मुक्ता विन्यसितुं वधूर्नृपशिरस्युद्यम्य कक्षद्वये ।
लग्नां वीक्ष्य महीपलोचनयुगीं वक्षोजकोशद्वये
लज्जाकुञ्चितपाणिरक्षिपदपाङ्गालीनहासाङ्कुरा ।।

९८ मुक्ता भूपतिमुक्ता वान्ताः कान्ताकुचान्तरे रेजुः ।
गण्डस्थलघर्मोदकधारासारैरिव द्विगुणाः ।।

९९ पतिना मुक्ता मुक्ताः कान्ताकुन्तलचयान्ततः पतिताः ।
भाविपुरुषायितच्युतसुमसञ्चयसूचका इवाराजन् ।।

१०० दीव्यत्पाणिरुहेषु शोणमणितद्ग्रैवेयनव्यप्रभा-
लुण्टाकेषु समुद्रसम्भवदरश्रीमोचके कन्धरे ।
माङ्गल्यं निबबन्ध बन्धुरनवाम्भोदावलीसुन्दरां
वेणीं किञ्चिदिवोक्षिपन् सरसिजास्याया महीवल्लभः ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०१ वैवाहिकेषु कर्मसु कुशला अस्थापयान् शुचिं कान्ताः ।
मणिमयपीठे च पटं तस्तरुरपि चित्रकर्मकिम्मीरम् ॥

१०२ तत्रोपविश्य विप्राऽऽहुतहरितशमीसमिन्निनादयुते ।
ज्वालाभीलहुताशे सतीपती जुहुवतुस्तदाऽऽहुतयः ॥

१०३ हुतशेषलग्नपञ्चषलाजो रेजेऽञ्जलिः कमलपाण्याः ।
हसतीव कृष्णवर्त्मज्वलाः किसलयमनोहराङ्गुलिभिः ॥

१०४ होमधूमावृतकुचा सा सगुच्छा बभौ लता ।
भर्तृवाञ्छारतिफलप्राप्त्यर्थमिव धूमिता ॥

१०५ प्रणयकलहकोपापोहनायोत्तमाङ्गो-
ज्ज्वलमकुटमणीनां स्पर्शनाभ्यासनार्थम् ।
किमु नरपतिरस्याः कोमलं पादपद्मं
प्रमदभरतिचेताः स्पर्शयामास शाणम् ॥

१०६ चेलाञ्चले हसन्त्यः कान्ता अग्रन्थयंश्च दम्पत्योः ।
कपटरुषा सा भ्रुकुटिं नारीं कोटयां च मदनोऽपि ॥

१०७ ततो धराधरपुरन्ध्रीघटितचेलाञ्चलग्रन्थिनौ तौ दम्पती प्रदक्षिणीकृत्य जाज्वल्यमानजातवेदसं, लोचनविषयीकृत्य तोषित रमाधवमुडुवीथीसुस्थिरस्थायिनं ध्रुवम् ; प्रणिपत्य परिणयागतसप्तर्षिकुटुम्बिनीदीप्यमानामरुन्धतीम् ; नम-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्कृत्य सकलसंयमिगणम् ; समेषां तेषां हस्ताभिमन्त्रिता अक्षता आदरेण धृत्वा मौलौ ; निखिलबन्धुनिवह-सम्मोदमारचयताम् ।

१०८ कल्पानोकहजातहाटकमणिप्रत्युप्तहारावलीः
क्षौमाणि "प्रहितानि यक्षपतिने" त्याख्याय वैवाहिके ।
मौहूर्ते सुरमौनिपाणिकमलेनादापयत्सादरं
कन्यायै नलकूबरो नृपतये सूत्रोज्ज्वलत्पाणये ।।

१०९ विभवानुगुणं चान्ये काञ्चनमणिभूषणानि च पटानि ।
तस्यै तस्मै च ददुः परिणयसमये समागताः स्वजनाः ।।

११० जामात्रे मदभद्रनैकपशतं क्षौद्राभदन्तोज्ज्वलं
भीकृद्बृंहितनादमुज्ज्वलघनाङ्गारोपमाक्षिद्वयम् ।
शृण्डादण्डमनोज्ञमुत्कटकटं पद्माञ्चितास्यं ददौ
गन्धर्वाधिपतिस्सुवृत्तनिटलं सौवर्णकक्ष्यांकुशम् ।।

१११ गन्धर्वाधिपतिर्नृपाय स ददौ मायूरपिञ्छप्रभं
स्फूर्जद्रोहितसङ्घसङ्कुलमिवाभ्रौघं नवं वार्षृकम् ।
धारावेगपराजितार्यमहरिं गान्धर्वगन्धर्वस-
न्दोहं काञ्चनवारवाणविलसत्प्रत्युप्तरत्नव्रजम् ।।

११२ मणिगणरुचिरं विमानमिछाऽ-
नुगुणविहारविवर्धितप्रमोदम् ।
बहुनिशितशरासिकुन्तवक्ष-
च्छिदपलकानि ददौ वराय तस्मै ।।

CC-0. Jangamnigam Digital Preservation Foundation, Chandigarh.

११३ पुनरपि रजतमहारजतशय्यासनभाजनदोलाकलाचिकाघट कटाहवीटिकापेटिकादिगृहोपकरणानि, मरकतकुरुविन्द-पुरुषरत्नपुरन्दरमणिमौक्तिकादिमहारत्नघटितकटकतुला-कोटिकण्ठिकाङ्गदैकावलीकाञ्चिकोर्मिकादिकलापकलापान्, अमूल्यागरुमृगमदसङ्कुमदकुङ्कमपटीरकर्पूरहिमाम्बु-पूरागरुधृतिपिष्टातयक्षधूपमङ्गल्वादिपरिमलद्रव्यसम्भार-परम्परान्, उदयद्यौवनमदा मृदुलाधरपल्लवप्रान्तविसारि-दरहासमेदुरचञ्चलदृगञ्चलप्रभाः, अभिनवाम्बुजकोशजि-त्परकुचद्वयीभासुराः इन्दिन्दिरसन्दोहमदापहारिविनील-शिरोजकलापाः, अम्बरस्पर्धिवलग्नाः, वाचाटविट-निकायमूकीकरणचणचाटुकारितागणनीयाः, नागरक-क्रियाकलापेषु गलरवच्छलालापाचरणरवणेषु प्रौढतमाः, रसिकजनधैर्यपश्यतोहराः, सुरुचिराभरणभूषिताः परिचा-रिकाश्च सहस्रसंख्याकाः पुत्र्यै अरणमयच्छत् ।

११४ अवनताङ्गुष्ठाग्रहार्यनिर्यद्रत्न–
खनिघनावृतमार्गमध्यमानि
मदमुदावहदिव्यमैरेयधौरेय–
गोत्रभित्पादपनिष्कुटानि
सुन्दरीशिशुजनग्राह्यमन्दिरचर–
न्मृगनाभिसौरभनिर्भराणि
प्रखराखुनखराग्रखननसमुद्भूत–
सौवर्णमृत्कीर्णजाङ्गलानि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कोककलहंसमुखरिताब्जाकराणि
सिद्धचारणगन्धर्वसेवितानि
आत्मजायै ददौ हरिद्रार्थमतुल–
मन्दरद्रोणिषु कतिचित्पुरवराणि ।।

११५ विविधोपहारसत्कृतविद्याधरयक्षसिद्धनागमुखान् ।
निजपुरजिगमिषुबन्धूनगमयदिन्दीवराक्षगन्धर्वः ।।

११६ इति शेषशर्मरचिते
मनुसम्भवनामके महाकाव्ये ।
अगमत्पञ्चमसर्गो
मनोरमोपयमनामको मधुरः ।।

इति श्रीकुण्टिमद्दि श्रीनिवासाचार्यस्य पण्डितप्रकाण्डस्य
पौत्रेण रङ्गाचार्यस्य पुत्रेण शेषशर्मणा विरचिते संस्कृत
मनुसम्भवमहाकाव्ये मनोरमोपयमो नाम
पञ्चमः सर्गः ।।

———

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनुसम्भवः

षष्ठः सर्गः

१ हीरस्तम्भमरीच्यधःकृतमिव ध्वान्तं तुराषाण्मणी-
वेदिर्यत्र विभाति पुष्करमिवोद्गाढं ग्रसित्वा पुनः ।

वान्तं राजति जालमर्गबहिरागच्छत्सुधूपव्रजः
कक्ष्या भान्ति सुगन्धपेटच इव चानन्ता कुरङ्गीदृशः ॥

२ कूजन्ति यत्र च विटङ्कगताः कपोताः
चित्राणि हाटकरसोल्लसितानि भान्ति ।

मञ्चा रटन्ति मृदुमक्षिकपातमात्रा-
त्तस्मिन् बहूपकरणाञ्चितरम्यसौधे ॥

३ धरणीरमणसमीपं प्रेषयितुं तां मनोरमां सख्यः ।
स्नातानुलिप्तधूपितपरिष्कृतां भीतबालमृगनेत्राम् ॥

४ पाटलचेलकां विशदमौक्तिकसारसनां वलक्षच-
न्द्रातपसूतिलोलतरहारलतायुतकम्बुकन्धराम् ।

चन्दनचर्चितां मृगमदाञ्चितशीर्षललामभूषितां
हल्लकमालिकाकलितसंयतकेशलसद्वतंसकाम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५ लोचयुगजितशफरीलाञ्छतमिव वामपादमञ्जीरम् ।
दधतीमलङ्कृतां तामनयन्नृपसविधमङ्गनानिवहः ।।

६ आनीता केलिगृहं गताऽगतावेति श ऊक्यमाना सा ।
कान्ता च्छायान्तरिता कवाटमूले स्रजैकदृश्याऽसीत् ।।

७ काले गते किञ्चिदिव प्रहासैर्नर्मोक्तिभिः केलिगृहं विहाय ।
व्याजेन केनापि सखीसमूहे याते रिरंसुर्नृपतिस्तदानीम् ।।

८ तस्याः करं स्वीयकरेण गृह्णन्
खट्वासमीपं शनकैर्निनाय ।
निवेशयामास लतान्ततल्पे
चकार शृङ्गारविचेष्टितानि ।।

९ "न तेऽनुरूपं तव पाटलस्य
चण्डातकं तन्वि ! तवेतदस्य ।
प्रावारकस्ये"ति कुचोपरिस्थं
परामृशत्पाणितलेन मन्दम् ।।"

१० निसर्गजो वाऽथ कुरण्टकोत्थः
पुनर्भवानां ननु राग एषः ।
पश्यामि किञ्चिन्मम दर्शयेति
निरन्तरोऽभूत्स नृपो नितान्तम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

११ सुगन्धधूपेन तनूलता ते
सन्तापिता हन्त नितान्तमेषा ।
इति ब्रुवाणश्शयपङ्कजाग्रं
विन्यास वक्षोजयुगान्तरे सः ॥

१२ ते हारयष्टौ मणयो मदीय–
हारस्थमुक्तासदृशा न वेति ।
तत्तारतम्येक्षणकैतवेन
तां वेपमानां तरसाऽऽलिलिङ्ग ॥

१३ कपोलयोः कुङ्कुमपत्रभङ्गे
सिताभ्रगन्धोऽस्ति तरां न वेति ।
जेघ्रीयमाणस्स चुचुम्ब तस्याः
सुपक्वबिम्बोपमदन्तवासः ॥

१४ इत्थं विलासैरपि नर्मवाग्भिः
सञ्जातकांक्षापि मनोरमा सा ।
स्वान्तानुवृत्ताधिमनुस्मरन्ती
प्रियेण तद्वारणमीहमाना ॥

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१५ नवोढताऽधीरतया लताङ्गी
पतिं तमाख्यातुमपारयन्ती ।
कोष्णाश्रुबिन्दूत्तकपोलपालि–
र्ददर्श जोषं बत निर्निमेषम् ।।

१६ स तादृशीं तामवलोक्य राजा
जगाद नश्यत्कुतुकप्ररोहः ।
ससम्भ्रमं तन्निटलार्धचन्द्र–
लोलालकानङ्गुलिभिर्निरस्यन् ।।

१७ उत्फुल्लपङ्केजविशालनेत्रे !
जोषं किमास्से किमु वा निदानम् ।
आनन्दसन्धायककेलिकाले
शोकस्य ते ? ब्रूहि सुधांशुवक्त्रे ! ”

१८ किं वा नु रम्भोरु ! मयापराद्धं ?
चकार वा कश्चिदुताप्रियं ते ? ।
आख्याहि तं मंक्षु मदीयशात–
कृपाणधाराविषयीकरोमि ।।

१९ किञ्चित्तवाकांक्षितमस्ति किं वा ?
निवेद्यतां मौनमपास्य कान्ते !
विधातृहस्तस्थितवस्तु वाऽपि
संसाध्य ते पाणितलेऽर्पयामि ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२० अर्थो मदीयो मम जीवितं वा
तवैव वाताशनवेणि! सर्वम् ।
अधीनमेषा हि कुतो नु चिन्ते–
त्युक्तं नताङ्गी तमुवाच कान्तम् ।।

२१ मदीयसख्यौ समदुःखसौख्ये
मुनीन्द्रशापेन नितान्तरुग्णे ।
बाधां निकामं विपिनेऽश्नुवाते
मह्यं नु रोचेत सुखं कथं वा ।।

२२ इति ब्रुवाणां तरलेक्षणां तां
जगाद भूपो हरिणाक्षि ! सख्यौ ।
रुजाभरान्मोचयिताऽस्मि चायु–
र्वेदेन चिन्तां दयिते विमुञ्च ।।

२३ कस्मिन् वने सम्प्रति तिष्ठतस्ते
सख्यौ? चिकित्सां करवाणि नूनम् ।
अन्वेहि मामित्यथ रंहसा त–
द्वनं तया साकमियाय तत्र ।।

२३ राकाचन्द्रनिभानने नृपवरो दृष्ट्वा तदीयामयं
खर्जूराचलमूलिकाऽगदमथाऽऽहारं च तस्योचितम् ।
दायं दायमहर्निशं स नियमैः कैश्चिद्दिनैः कन्यके
राहून्मुक्तनिशापतेरिव कले मुक्तामये आतनोत् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२५ तद्दिव्यौषधसेवनादपगतव्याधिव्यथे योषितौ
सामोदे विकचारविन्दविहसन्नेत्रद्वयीभासुरे ।
सौदामिन्यभिरामदेहरुचिरे सम्पूर्णचन्द्रानने
मल्लीपुष्पविडम्बिहासललिते ते अस्तुतां तं नृपम् ।।

२६ नरवर! रचिताऽस्मभ्यं भवतोपकृतिस्तुलारहिता ।
प्रत्युपकुर्मो नु कथं? तथापि भवताऽनुमन्यतामेतत् ।।

२७ श्रुणु तावदिदं प्रथमं वृत्तान्तं श्रावयामि तु मदीयम् ।
इतिमधुरवाक्पराजितकीरी काचिज्जगाद कमलाक्षी ।।

२८ मन्दारविद्याधरकन्यकाऽहं
भूमीश! नाम्ना तु विभावसीति ।
जानामि भूमीतलवासिसर्व–
शकुन्ततिर्यक्कुलभाषितानि ।।

२९ गृहाण राजन्! सकलां कलां तां
साकं मदीयेन करेण चेति ।
ततः पिकीकोमलवाग्द्वितीया
वसुन्धरानाथमिदं जगाद ।।

३० "ब्रह्मर्षिरस्मज्जनकस्स नाम्ना
पारस्समभ्यस्तसमस्तविद्यः ।
तितप्सया प्राप्य वनं द्विरेफ–
शारीपिकालीमुखरं कदाचित् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३१ फलमूलच्छदनाम्बुभुक्तिपवनाभ्यासक्रियायुक्तिनि-
र्दलितान्तर्गतशत्रुवीरनिकरोद्यद्गर्वसर्वस्वकः ।
रविरुग्वृष्टिसमीरशीततुहिनैर्नोद्विग्नचित्ताम्बुजो
जनितानन्दभरो मुकुन्दचरणध्यानानुसन्धानतः ॥

३२ तिष्ठन्नङ्गुष्ठाग्रे पश्यंस्तीष्णांशु बिम्बमनिमेषम् ।
कीलावलिलीढाम्बरचतुराशादीप्तवायुसखमध्ये ॥

३३ सुरगरुडयक्षकिन्नरनरराक्षससिद्धसाध्यनागानाम् ।
विस्मयजनकं स तपस्तेपे मघवा बिभाय तत्तपसः ॥

३४ भीतश्च "तस्य निकटं याही"ति स पुंजिकस्थलानाम्नीम् ।
अप्सरसं मरुतां पतिरादिशदथ साऽपि तन्निदेशेन ॥

३५ आकर्ण्य मञ्जुवचनानि शुकेषु नील-
वेणीं विलोक्य मधुपेष्वनुसन्तपत्सु ।
पारस्य सन्निधिमगात्सविलासमन्द-
गत्या निशातमिव मान्मथमोहनास्त्रम् ॥

३६ तदानीम् ।

३७ रम्यावर्तं मलयजमरुद्वाहमारुह्य गृह्णन्
वल्गद्वल्गां मधुकरमयीं पल्लवालंकृताङ्गः ।
वृक्षावासिप्रशिथिलदलं धावयामास राजं
हेमन्ताख्यं सुरभिसमयः कोकिलाकाहलीभिः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३८ उत्सूनाः प्रथमं पुरातनदलस्थानान्तरालक्षिताः
पश्चाद्बालशुकच्छदाङ्कुरसमास्तुल्यास्ततः कोरकैः ।
चण्डा तस्य ततश्शनैर्विदलिताः किञ्चित्प्रवृद्धाः क्रमात्
श्यामा दीर्घतराश्छदा रुरुचिरे सालेषु वल्लीषु च ।।

३९ अधावयन् मौकलयः पिकालीः
पपुर्निकामं मधुपा मरन्दम् ।
सुराङ्गनाः पान्थजनस्य बाधां
हिन्दोलरागेण तदा वितेनुः ।।

४० मन्दानिलचलन्मल्लीपरागापूर्णचन्द्रिकाः ।
चन्द्रिकानिर्झरोद्वेलकल्हारमधुनिम्नगाः ।।

१४ मधुपानमदोन्मत्तभृङ्गीमञ्जुलनिस्वनाः ।
भृङ्गीरवप्रतिध्वानत्पान्थस्त्रीरोदनारवाः ।।

४२ पन्थारुन्तुदपुष्पास्त्रकोदण्डगुणनिक्वणाः ।
जजृम्भिरे मधून्मत्तयूनां निधुवनानि च ।।

४३ ततस्सखीभिस्सविलासयान–
सल्लापहासाभिरुपेयुषी सा ।
उद्दीपयन्ती मदनं समीपं
मुनेः प्रसूनापचयापदेशात् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४४ निर्मोकसन्निभसुचेलकदृश्यमान–
चण्डातकेन कबरीभरहल्लकेन ।
वक्षोजकुम्भमृगनाभिपरीमलेन
कामस्य मोहनमिवास्त्रमगान्निशातम् ।।

४५ मनोज्ञनेपथ्यकृतावतारा
भृङ्गीरवश्रुत्यनुगीतगाना ।
अपश्यतेवाऽशु विलोक्यमाना
तन्वी मुनेर्दृग्विषयीबभूव ।।

४६ तत्ताम्बूलपरीमलोऽधरदलं श्रोणिश्च वेणिस्तथा
सौवर्णप्रतिमा तनुस्तनुतरा रोमावलिः श्यामला ।
रम्भास्तम्भनिभोरुकाण्डयुगली वक्षोजकुम्भद्वयी
धैर्यं बाढमखण्डयन् सुमधनुःकाण्डा इवेतन्मुनेः ।।

४७ रोमाञ्चितसंहननः स्नानं ध्यानं जपं तपस्सन्ध्याम् ।
विस्मृत्य मदनवशगः कम्पन् स मुनिः कुरङ्गनयनां ताम् ।।
४८ दक्षेति जग्राह करे गृहीते हस्ते शिरः किञ्चिदिवावनम्य ।
कान्तां पतन्तीमवशामिव स्वं नीत्वा कुटीरं समरंस्त कामम्।।

४९ इत्थं तया साकमपास्तशङ्क–
मज्ञातरात्रिन्दिवमिष्टभोगैः ।
मनोजसाम्राज्यधुरन्धरस्सन्
निनाय कालं स मुनिर्महान्तम् ।।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५० कृतार्थयन्तौ मदनं लतान्त–
कुञ्जेषु वन्यासु च तौ नगेषु ।
चिक्रीडतुर्गर्भमधत्त कान्ता
समाययौ वैजननोऽपि मासः ।।

५१ प्रसूय मां सा विपिनान्तरे द्राक्
निरस्य याता स कृपायुतोऽपि ।
नालोक्य किञ्चित्प्रययौ मुनीन्द्रो
ब्रवीमि किं वा धरणीतलेन्द्र ! ।।

५२ इत्थं मातापितृपरित्यक्ता क्षुधाव्यथादोदूयमानाऽहं रार–
ज्यमानसुधांशुमण्डलनिस्सरत्तुषारकिरणप्रणालिकामिलद-
मृतरसग्रसनेन कतिपयैरेव दिवसैः चतुरस्रशोभिना कायेन
कान्तिपूरेणेव पूर्णेन रमणीयां मामालोक्य प्रीतमना मुनि-
र्नीत्वा निजाश्रमं शशिकलावर्धनात् शशिकलेति कृत्वा-
ऽभिधानं पोषयति स्म । अहमपि जनकसेवापरतन्त्रा-
प्रबर्धमाना आसम् ।

५३ पश्यद्युवानं पुनरुन्नमय्य
विलोचने वीक्षितुमर्गलन्त्या ।
हि्या मनोज्ञा नवयौवनेन
पूर्णा समेषां नयनान्यकार्षम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५४ मां दृष्ट्वा नवयौवनेन ललितां कश्चित्तदा खेचरः
देवार्पितमयि लालसो मुनिवरं पर्णोटजान्तर्गतम् ।

निश्शङ्कं समुपेत्य बान्धवयुतो वैश्वानरार्चारतं
जायार्थं तनयामयाचत पिता श्रुत्वा तदीयं वचः ॥

५५ सेमन्तीसुमसन्निभैर्भुजगभुग्वर्हैस्समालङ्कृतै-
रुष्णीषैररुणैर्विलोचनयुगैर्नैस्त्रिंशिकैर्बाहुभिः ।

हालागन्धकगर्भकैः परिमलैः कर्पूरताम्बूलजै-
स्ताम्बूलीरसनिह्नुताधरगतैर्दन्तक्षतैर्लक्षितान् ॥

५६ जिह्वारङ्गनटद्बहुविकत्थनालापमुखरगन्धर्वान् ।
शीर्णपटीरालेपानालोक्य जुगुप्सितो जगादैवम् ॥

५७ धन्योऽहं सफलो मदीयविमलो वंशश्च चर्या तपः
श्रीर्विद्या चरितार्थतां समगमन् हन्तान्ततो मद्गृहम् ।

वेश्याऽऽवास उपेत्य "देहि तनयामित्यर्थनात्" कीदृशं
ब्राह्म्यं बान्धवमप्यहो ! चलत रे दूर्वारगर्वोद्धताः ॥

५८ त्वादृशाः किमु कदापि कन्यकाः
निर्भयं ननु मुनीन् ययाचिरे ? ।

कीदृशी च मदमत्तता नु रे
हन्त ! कीदृगविमृश्यकारिता ? ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५९ इति नस्तित इव वृषभः
कोपोद्रिक्तस्स दूषयामास ।
ते तु निराशा निर्ययु–
रावासो वृद्धता हि कोपस्य ।।

६० मय्यासक्तमना वाञ्छाभङ्गात्क्रोधेन घूर्णितः ।
तदानीं स तु गन्धर्वः तातमेनमभाषत ।।

६१ वैशिष्ट्यं परदूषणेन किमु ते विभ्राजते ? त्वन्नु वा
हीनोऽहं किमु वा न यच्छसि सुतां? मा यच्छ कस्त्वं पुनः ।
शीलं वर्तनमन्वयं गणयितुं मे? प्राणितुं कल्पसे
भूमौ ? विप्रकुपूय! नास्ति सदृशो हीनस्त्वया दाम्भिक ।।

६२ विनिन्द्यैवं गतस्तातमर्धरात्रे जघान ह ।
असिना किन्न कुर्याद्वा कामान्धः स्यान्न कीदृशः ।।

६३ कृत्यमानशिरास्तेन चुक्रोश मुनिपुङ्गवः ।
उत्थाय दीपं प्रज्वाल्याऽपश्यमत्याहितं कृतम् ।।

६५ दृष्ट्वा विकलचित्तां मां रुदन्तीं सम्भ्रमेण च ।
प्रावृण्वन् ऋषयः प्रातिवेश्यास्सर्वे समागताः ।।

६५ अत्रान्तरे तु देवापिरधावत्पितृमारकः ।
निशा प्रभातप्रायाऽसीत्क्रमशश्च दिशो बभुः ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६६ धारालक्षतजोक्षितघोरजराधवलितोरुकूर्चस्य ।
खड्गनिकृत्तशिरोधेरुटजे पतितस्य जीर्णस्य ।।

६७ नैष्ठिकं वह्निसंस्कारं निर्वर्त्य च यथाविधि ।
अम्बायितञ्च बाल्यादि तातमुद्दिश्य दुःखिताम् ।।

६८ प्रमीते तादृशे ताते कुतो जन्मेति चिन्तया ।
मुमूर्षुमाह मां गौरी क्वाऽपि यान्ती दयामयी ।।

६९ बाले ! बालकुरङ्गलोलनयने ! मा साहसं त्वं कृथाः
सौन्दर्यालय काय एष सुलभो वामेन दुःखेन किम् ।
त्याज्योऽयं ? भवितातिलोकविभवो भर्ता स्वरोचिः भवेः
श्रीरम्या विभवोज्ज्वला मुदति! मे वागन्यथा किं भवेत्?।।

७० किञ्चेदं शृणु ललने! प्रीत्या दास्यामि पद्मिनीविद्याम् ।
गृह्णीष्व तत्प्रसादादभीष्टसौख्यानि सिध्येयुः ।।

७१ इति सरहस्यं तां विद्यामुपदिश्य यथायथमगात्त्रिलोचनवाम-
लोचना । अहमपि तद्वचनास्वादनालम्बना धरामि प्राणान् ।
मन्ये त्वां तत्स्वरोचिरिति" इति । स च महीपतिरूरीचकार
तद्वचनम् ।

७२ सचैकाग्रमना विद्ये गृहीत्वा तत्प्रबोधिते ।
पुण्याहपूर्वकं ते द्वे उपमेये शुभेऽहनि ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७३ तारापथे त्रिदशदुन्दुभयो ननर्दुः
पुण्याक्षताश्चकरुरप्सरसो नुनाव

सिद्धव्रजोऽपि च ववर्ष लतान्तवृष्टि–
र्वायुर्ववौ च शुभलक्षणदाक्षिणात्यः ।।

७४ इत्थं शिरीषसुमपेशलचञ्चलाक्ष्यः
कान्ता उदुह्य दिविषल्ललनात्मजस्सः ।

उद्यानकुञ्जनगकन्दरसैकतेषु
नानाविहारनिरतो दिवसाननैषीत् ।।

७५ गङ्गातरङ्गिणीरङ्गदुत्तुङ्गोर्मि–
शीकरशीतलसैकतेषु
मन्दारमाकन्दमकरन्दतुन्दिले–
न्दिन्दिरानन्दकृन्नन्दनेषु
कान्तनिशाकान्तकान्तवितर्दिका–
कान्तभूभृद्वृन्दकन्दरेषु
मसृणबिसाहारमांसलहंसिका
सम्पदासारपद्माकरेषु
मम ममैव प्रियोऽयमित्यतुलराग–
रञ्जिताभिश्च ताभिर्नृपतिररमत
पद्मिनीशक्तिसाधितबहुविधान्न–
पानस्रग्भूषणाम्बरसञ्चयैश्च ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७६ पद्माक्षीसहितो नृपस्स विहरन्निच्छानुरूपं क्वचि-
त्कासारं रमणीयशीतलपयःपूरं ददर्शादरात् ।
तीरोत्पन्नमहोन्नताम्रकदलीमाकन्दमन्दारस-
ङ्कीर्णानेकशुकीविदारितफलच्योतद्रसोत्सेकितम् ।।

७७ दृष्ट्वा तत्तीरतले विजहाराकृष्टमानसः पवनैः ।
नन्दनवनसुन्दरहरिचन्दनवनवाटिकासमुत्पन्नैः ।।

७८ तत्रैका कलहंसिका वनमरुन्नुन्नोर्मिकामालिका-
डोलास्वैरविहारतत्परमतिर्दूरस्थकोकाङ्गनाम् ।
आहूयात्मसमीपमित्थमवदत्पत्यैकमत्यायुताः
पश्यैता रमणीः तपः किमतपन्नेताः कियत्कुत्र वा? ।।

७९ पत्युस्सत्यां सत्याः पत्यां वा प्रेमनिर्भरं प्रायः ।
पत्यास्सत्याश्च समं परस्परं तत् पुरा सुकृतलभ्यम् ।।

८० अस्मिन्नत्यन्तरक्ताः कुवलयनयना भूमिनाथेऽवनीपः
सम्पूर्णप्रेमयुक्तो विकसितसरसीजातवक्त्रासु तासु ।
तस्माद्दाम्पत्यमेतत्प्रमदमजनयन्निस्तुलं हे वयस्ये ! ।
संयोगो रत्नकान्त्योस्सुमपरिमलयोर्वाऽविनाभावयुक्तः ।।

८१ इत्थमुक्तानि हंसीवचनानि उपेक्ष्यमाणा चक्रवाकी
तमेवमवदत् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८२ "बुध्वा चैका निधुवनगतं तुष्टचित्ताम्बुजातं
कान्तं का वा न भजति पुनर्मानमूरीकरोति ।
प्रेमाणं वा कथमयि पुनर्ब्रूहि मा मत्समीपे
प्रेमैतेषामधममधमात् वन्दिवन्मानयन्ती ।।

८३ बह्वीष्वेकस्य न स्यात्कथमपि च समं प्रेम नानावधूना-
मेकस्मिन्वाऽपि तस्मान्न भवति नियता प्रीतिरस्मिन्महीपे ।
कान्तानां कामिनीष्वप्यवनिपरिवृस्यास्य वा केवलं स्या-
त्तावद्यावच्य पत्युः परिजननिवहस्यानुरागो मिथः स्यात् ।।

८४ अधिकानुरागकलिता अप्येकानिधुवनानुगतदयितम् ।
वीक्ष्य कथं नु च का वा पत्यौ प्रेम्णानुवर्तेयुः ।।

८५ तस्मादासां विद्याविक्रमकोशल्यलग्नचित्तानाम् ।
दासीनामिव भर्तरि रागोऽणीयान् किमस्य कथनेन? ।।

८६ एकानुरक्तदयितो दयिता चैकानुरागिणी ।
श्लाघ्यौ "रागस्तु बह्वीषु स्या" दित्येतन्मृषा सखि! ।।

८७ बहुभिर्वचनैः किं वा सौभाग्यकलाविलासधन्यानाम् ।
अहमेव हि मूर्धन्या धन्यतमो भुवि मदीयपतिरेव ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८८ इत्थं सकलपशुपक्षिभाषाप्रवीणस्य स्वस्य
पुरत उच्चैरुक्तं चक्रवाकीभाषणं निशम्य वरूथि-
नीसुतो मन्दाक्षसंयुतोऽवाक्छिरा दीर्घमुष्णं च
स निशश्वास । ततस्स अवार्यानुरागेण कान्ता-
भिस्ताभिश्शतवर्षाणि सौख्यमनुभवति स्म ॥

८९ भूजानिस्स तु जातु तप्तकनकोद्गाढप्रभामञ्जुव-
क्त्राञ्चन्मेचकरत्नविभ्रमसनाथानूनदृग्रोचिभिः ।
राजद्भिः कमनीयबालहरिणीसङ्घैर्वृतं तद्वनी-
प्रान्तक्षोणितले ददर्श हरिणोत्तंसं मनोहारिणम् ॥

९० दृष्ट्वा तादृशहरिणं हरिणाक्षीर्दर्शयति नृपे तस्मिन् ।
आघ्राय कुरङ्गास्यं लिहतीषु च कन्धरां तासु ॥

९१ हुङ्कुर्वन् स जगाद "गच्छत हला! नाहं स्वरोचिस्सदा
पङ्केजायतलोचनारतिसुखास्वादाय हीना हि या ।
मह्यं नैव च रोचते ननु भवच्चर्या जुगुप्स्ये तरां
वृत्वा कञ्चन कामिनं रतिसुखं भुङ्ध्वं रिरंसा नमे ॥

९२ चञ्चलेन्द्रियसौख्याय युवतीनां परिग्रहः ।
द्रविण्यं चास्य कान्ताभिरार्जितं ननु भूभुजः ॥

९३ तेनात्र च न चामुत्र सुखलेशोऽस्य विद्यते ।
न मामेतादृशं नार्यो मनुध्वं सुखलोलुपम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

९४ नाहं भ्रान्तस्समाकृष्टुं कान्तापाङ्गमरीचिभिः ।
मयि रागं परित्यज्य यात यूयं यथायथम् ।।

९५ इत्थं विनिन्दितवचांसि मृगस्य भूपः
श्रुत्वा रथाङ्गतरुणीवचनानि पूर्वम् ।
आकर्णितानि पुनराकलयन्नितान्त–
चिन्ताकृशानुपरिदग्धमना बभूव ।।

९६ नूनं जुगुप्सानिलया जलजायतलोचनाः ।
मास्तु सङ्गतिरेतासामिति निश्चित्य चापि सः ।।

९७ दुर्वारेहासमाकृष्टो लुप्तविज्ञानवैभवः ।
षट्शतं दैववर्षाणां विजहार पुनः पुनः ।।

९८ ततः कालक्रमेण मनोरमायां विजयं विभावस्यां मेरुनन्दनं कलावत्यां विभावसुं (चेति) नन्दनत्रयं प्राप्य क्रमशस्तेषु प्रवृद्धेषु पाकशासनदिशामुखे विजयस्य विजयाख्यपुरं कौबेरदिग्भागे मेरुनन्दनस्य गन्धवतीपुरं दक्षिणस्यां दिशि विभावसोः धारह्वयपुटभेदनं निर्माय, अनल्पविभवेन तांस्तेष्वभिषिच्य कृतार्थीबभूव । तत एकदा ;

९९ सज्जस्सज्जशरासनो नृपमणिस्तूणीरधारी समि–
ज्जेता शासितशात्रवस्स मृगयाकौतूहलोल्लासितः ।
कस्मिंश्चिद्गहने कदाचिदचरत् सन्त्रासयन् जन्तवो
धावच्छ्वापदडीयमानपतगांश्छेत्तुं च बद्धादरः ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०० तदानीं स भूदारः ।

१०१ जम्भारिदम्भोलिसंरम्भदर्शन–
धावदञ्जनमहाभूधरमिव
झञ्झाप्रभञ्जनास्फालनसंत्रास
निर्यातसंवर्तवारिदमिव
कठिनकण्ठेकालकण्ठं परित्यज्य
वहिरागतोज्ज्वलविषगुडमिव
कलुषधूर्वहदुष्टसन्दोहदण्डनो–
द्दण्डकृतान्तदण्डायुधमिव
घुर्घुरारावसञ्जातघूर्णमान–
सिन्धुपाथस्तिमिङ्गिलग्राहशङ्कु
भूनभोन्तरनीरन्ध्रमुत्पतन्त–
मेकभूदारमवलोकयाम्बभूव ।।

१०२ दृष्ट्वा मौर्वीनिनादं व्यतनुत भुजगक्रूरनाराचमेकं
सन्धायात्मीयबाहार्गलचटुलमहोद्दण्डकोदण्डकाण्डे ।
यावन्मोक्तुं युनक्ति द्रुततरगमना काचिदेत्याब्रवीत्तं
भूमीनाथं कुरङ्गी विशदनरगिरा लोलनेत्राभिरामा ।।

१०३ राजन् ! कुप्यस्यस्मै को वा रचितोऽपराध एनेन ? ।
करुणां कुरु कुरु मां ते चापारोपितशरस्य शरव्यम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०४ इत्युक्तां तामवदत्कुत एवं त्वं ब्रवीषि च कुतस्ते ।
हृद्यशरीरेऽनास्थेत्यनुयुंचानं जगाद हरिणी सा ।।

१०५ "अन्यकान्तानुरक्तस्य पत्युर्निधुवनेच्छया ।
समीपगमनान्मृत्युर्ज्यायसी" ति ततो नृपः ।।

१०६ "त्वदीयं हृदयं गाढलग्नं कस्मिन् ? कुरङ्गि तत् ।
आख्याहि मा" मित्यवदत् प्रत्युवाच मृगी नृपम् ।।

१०७ राजन् ! मदीयहृदयं त्वयि गाढलग्नं
दोदूयते विषमसायकचापमुक्तैः ।
विद्धं शरैरपि च पञ्चभिरर्हसि त्वं
बाधामिमां शमयितुं परिगृह्य दीनाम् ।।

१०८ श्रुत्वा तदीयवचनं पुनरब्रवीत्सः
"मर्त्योऽहमङ्ग ! भवती हरिणाङ्गना हि ।
स्यान्नो कथं नु मिथुनोचितकार्यजात–"
मित्युक्तमानवपतिं हरिणी जगाद ।।

१०९ "आलिङ्ग मां नृपवतंस दृढानुराग–
नीरन्ध्रनिर्भरभवत्कभुजद्वयेन ।
तृप्ता भवेयमियते" ति तदा दयार्द्रः
क्रोडीचकार हरिणीं धरणीबिडौजाः ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

११० तस्यालिङ्गनमङ्गलेन हरिणीवल्लीमतल्लीतनु-
र्दीव्यत्पल्लवचारुपाणियुगला गुच्छोरुवक्षोरुहा ।

हृद्योदग्रनिशातकुट्मलनखा लोलन्मृगीलोचना
शम्पावल्लिसमानकोमलतनुस्तन्वी बभूवाञ्जसा ॥

१११ तन्वीभूतां वीक्ष्य तां शोभनाङ्गी
भूमीनाथो विस्मयाविष्टचेताः ।

पप्रच्छैनां का त्वमित्थं कुरङ्गी-
भूत्वेदानीमङ्गनात्वं प्रपन्ना ? ॥

११२ इत्यनुयुक्ता तेन सा तममरकामिनीतनूभवमेवमवदत् । "हे नरेन्द्र! अहमेतद्वनदेवता सर्वनिलिम्पप्रार्थनया सकलभुवनरक्षादक्षं मनुवर्यं भवत्समागमेन प्रसुसूषया समागताऽस्मि । अनु रागवतीं मां परिगृह्य जनय मय्यपत्यम् । तेन ते भविष्यति पुण्यलोकप्राप्तिः" इति । सोऽपि तद्वचनमनुमन्वानस्तया सहकचित्तेन विविधविनोदक्रीडाकलापैः सुखान्यनुभवति स्म । कतिपयैर्दिनैस्साऽपि बभूवान्तर्वत्नी । ततः कस्मिंश्चिच्छुभे लग्ने ;

११३ सा पुत्रं सुषुवे विशालनयनं प्रस्फीतवक्षोरुरं
पञ्चास्योद्भटशौर्यधुर्यपरिघाव्यादीर्घबाहुद्वयम् ।

पञ्चास्त्रप्रतिमं महोज्ज्वलतनुं साम्राज्यहेतुप्रभू-
ताञ्चल्लक्षणलक्षितं सुगुणरत्नानीकरत्नाकरम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

११४ ननृतुस्सुरसुन्दर्यो गन्धर्वास्तुष्टुवुर्जगुश्च किन्नर्यः ।
वादित्राणि सुराणां दध्वनुरुदये च तस्य तनयस्य ॥

११५ मातापित्रोस्तयोर्जातस्स्वारोचिषसमाह्वयः ।
शान्तिदान्तिदयासत्यशौचादिगुणभूषितः ॥

११६ जित्वा कामं तपस्तेपे करुणावरुणालयम् ।
ध्यायन्मनस्यैकतानः कलशाब्धिसुतापतिम् ॥

११७ इत्थं तीव्रतरतपश्चर्यानिरतस्य तस्य व्यतीयाय महान् कालः।
ततः कदाचित् ;

११८ कालाम्भोधरमेचकेन वपुषा फुल्लारविन्दप्रभा-
लुण्टाकाक्षियुगेन तप्तकनकच्छायेन चेलेन च ।

आदित्योज्ज्वलकौस्तुभेन च रमारामामनोज्ञोरसा
विष्णुश्शम्भुपितामहेन्द्रदिविजैस्तस्याविरासीध्दुरि ॥

११८ एवं लोचनयुगलीगोचरमेनं प्रणम्य साष्टाङ्गम् ।
सपुलकहर्षाश्रुजलं नुनाव भक्त्या तमिन्दिराजानिम् ॥

१२० जय जय दानवदारणकारण शार्ङ्गरथाङ्गगदाऽसिधर
जय जय चन्द्रदिनेन्द्रशतायुत सान्द्रशरीरमहःप्रसर ।

जय जय तामरसोदरसोदर चारुपदोज्झितगाङ्गझर
जय जय केशवकेशिनिषूदन मारमणीधव पापहर ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१२१ ब्रह्मा त्वं शङ्करस्त्वं त्रिदशपरिवृढस्त्वं त्वमग्निश्च वायु-
स्त्वं वह्निस्त्वं प्रचेतास्त्वमसि खरकरस्त्वं कृतान्तस्त्वमेव ।
विश्वेदेवास्त्वमेव त्वमसि च मरुतः त्वं हि रुद्रास्त्वमेवा-
दित्या मन्त्रास्त्वमेवाऽव्यय ! निगमगणास्त्वं हि सर्वा-
न्तरात्मन् ॥

१२२ प्रणवः स्मृतयो वेद्यस्त्वमेवैते समे सुराः ।
सर्वशेषिन् ! नमस्तेऽस्तु शेषभूतजडाजड ॥

१२३ कर्ता भर्ता चहर्ता त्वमखिलजगतामीशिता त्वं प्रधानं
कालात्मन्! पूरुषार्थस्त्वमसि हि करुणावारिधे! वारिजाक्ष! ।
लक्ष्मीजाने! परं त्वां शरणमुपगतो भक्तिबद्धाञ्जलिस्सन्
नौम्यार्तं पाहि दीनं भवजलधिमहावर्तबम्भ्रम्यमाणम् ॥

१२४ कल्पान्ते तुङ्गभङ्गोच्चलितजलनिधौ चङ्क्रमन्तं भवन्तं
प्रोष्ठीमूर्त्या महत्या नतनयनयुगैः पश्यतो वासिनः स्वः ।
और्वाग्नेः स्मारयन्ती दिशि दिशि विसरच्चञ्चलापाङ्गरोचि-
र्माला तात्रायतां तेऽवितनिगम! भवाम्भोनिधेर्मा मुरारे ॥

१२५ शैथिल्यं नु भजेद्विशङ्कटपयःकल्लोलजालाहता
भूरेषेति हि शङ्खघोक्तिकमणिस्तोमं घरट्टीभवन् ।
मन्थानाद्रिकशेरुकाभ्रमणतो लेपं पिनष्टीव यः
प्रत्नं कूर्ममुपास्महे सकरुणं निश्श्रेयसावाप्तये ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१२६ यन्निर्मग्नवरिष्ठविग्रहभृशोच्छ्वूनेन निर्गच्छता
दीर्णाजाण्डकटाहकुल्यविवराद्ग्रीवायितेनाम्भसा ।
काचं कुण्डमिवाबभौ कमलजस्याण्डं तदन्तर्गता-
धोलोकान् प्रविदार्य यो धरणिमुद्दध्रे श्रये तं किटिम् ।।

१२७ दैतेयान्त्रपरीतनिष्ठुरनखश्रेणीलसद्बाहुजा-
युग्मं नाकसभाङ्गणेऽरुणसुमस्रग्भूषितं रक्षसाम् ।
त्रासाय क्रकचैर्युतं नरहरे! रारज्यते तोरण-
स्तम्भद्वन्द्ववदंहसां मम लुनात्वोघं भवस्याङ्कुरम् ।।

१२८ दैतेयाधिपपाणिपङ्कजविनिर्मुक्तैस्तु दानाम्बुभि-
र्गीर्वाणप्रभुदैन्यदुःखितमहामौनीन्द्रपत्न्या दृशोः ।
अस्राम्बून्यदितेरपोह्य ववृधे ब्रह्माण्डरोदोन्तरं
नीरन्ध्रं रचयन्नमामि तमहं भक्त्या मृषावामनम् ।।

१२९ स्वीयापत्यनिबर्हणोत्थदुरितापोहाय मौर्वीकिणै-
र्युक्तं बाहुयुगं शमन्तकसरस्तोये निवापाञ्जलेः ।
दित्साकैतवतो निमज्जयति यो वन्दामि तं तापसं
रामं मामकघोरदुष्कृतवनीदावानलं भार्गवम् ।।

१३० मन्वानस्य पवि तृणाय च दशग्रीवस्य देहस्थितान्
धातून् खण्डयितुं कृताभ्यसनवत् द्राक्सप्ततालद्रुमान् ।
भित्वा भूमितलं समीरविशिखो यस्याविशल्लीलया
तं सीतारमणीमणीसहचरं श्रीरामचन्द्रं भजे ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१३१ प्रवर्धमानं दनुजं प्रलम्बं
स्तम्बेरमं सिंह इवाधिरुह्य ।
जघान यस्तं प्रणमामि मूर्ध्ना
हलायुधं श्यामलचेलरम्यम् ।।

१३२ यद्बाहु शम्बो मनुजासिकेशि
पिचण्डशैलं ववृधे प्रविश्य ।
मृतस्य कायो वलयाग्र्यरत्नं
यस्याभवन्नन्दकुमारमीडे ।।

१३३ कृते युगे सन्निहिते तु भूमिं
यो म्लेच्छरक्ते स्तिमितां ततान ।
काश्मीरशादैरिव गोमुखानि
कुर्वन् भजे सादिवरं रमेशम् ।।

१३४ पनायितस्तेन सुदर्शनायुधो
दयार्द्रचेतास्तमुवाच राट्सुतम् ।
अहं प्रसन्नो यदपेक्षितं वरं
वृणीष्व वत्सेति तदा जगाद सः ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१३५ इच्छामि ते दास्यसुखं मुकुन्द !
समानलोके न परं तु याचे ।
पात्रं यदि स्यां कुरु मामपाङ्ग–
रोचिस्तरङ्गाप्लुतमिन्दिरेश ! ।।

१३६ इत्थं याचमानं तं श्रीमन्नारायण एवं प्रत्यवदत् ।

१३७ दास्यामि तुभ्थं ननु वत्स नूनं
सालोक्यमन्ते परिरक्ष तावत् ।
धर्मेण भूमिं विधिदेवतर्षि–
प्रियाय भूत्वा च मनुर्द्वितीयः ।।

१३८ इत्युक्त्वा त्वभिषिच्य तं मनुपदे फुल्लारविन्देक्षणो
ब्रह्मेशेन्द्रमुखामरैः स्तुतिपरैरन्तर्दधे केशवः ।
राजा रञ्जयति स्म सन्ततिसमं धर्मानुसारं प्रजाः
शिष्टानामवने रतस्स सदयं दुष्टान् पुनर्दण्डयन् ।।

१३९ ववर्ष वृष्टिस्समयानुकूलं
सस्यानि चामूलशिखं च फेलुः ।
प्रजा बभूवुः सुहितास्सुपुत्रैः
पौत्रायुरारोग्यधनैश्च धान्यैः ।।

CC-0. Panini Kanya Maha Vidyalaya Collection. Digitized by eGangotri

१४० वामा बभूवुः पतिदेवताकाः
शेमुश्च रोगाग्निरुजाभयानि ।
न चाप्यकाले मृतयो बभूवुः
न चेतिबाधाऽजनि नापि डिम्बः ।।

१४१ पयस्यमासीद्बहुलं सुमानि
रसाश्च गन्धा बहलीबभूवुः ।
श्रियो ववर्धुस्तुतुषुर्नराश्च
तस्मिन् महीं शासति राजचन्द्रे ।।

१४२ स्वारोचिषाख्यमनुसम्भवकाव्यमेत-
दान्ध्रीगिरा विरचितं कविपेट्टनेन ।
शेषेण संस्कृतगिरा परिवर्तितं यः
पापठ्यते भजति चेह शुभान्यमुत्र ।।

१४३ चजदकशकवर्षे क्रोधि चैत्रे निजेऽस्मिन्
ननु बहुलचतुर्थ्यां गीष्पतेर्वासरे च ।
अजनि परिसमाप्तं सर्वमेत्तु काव्यं
मनुचरितसमाख्यं शेषशर्मप्रणीतम् ।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति श्रीकुण्टिमद्दि श्रीनिवासाचार्यस्य पण्डितप्रकाण्डस्य
पौत्रेण रङ्गाचार्यस्य पुत्रेण शेषशर्मणा विरचिते संस्कृत
मनुसम्भवमहाकाव्ये स्वारोचिषमनुसम्भवो नाम
षष्ठः सर्गः ॥

समाप्तोऽयं ग्रन्थः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शुद्धाशुद्धपाटिका

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
४	१०	तद्गृहं प्रति	तस्य सदनाय
१३	७	विज्ञातु	विज्ञातुं
१७	५	आश्चर्येण	आश्चर्येण
१७	१५	निष्क्रयाभ्यां	निष्क्रियाभ्यां
१८	१४	सुमनः कोदण्ड	सुमनःकोदण्ड
२०	९	शिति कण्ठ	शितिकण्ठ
२१	११	लवली मल्ली	लवलीमल्ली
२२	१७	धनुः काण्ड	धनुःकाण्ड
३३	६	पङ्कलिप्रं	पङ्कलिप्तं
३३	१६	लिप्रं	लिप्तं
३८	२	तरूणी	तरुणी
५७	७	पररोपरि	परम्परोपरि
६७	११	खङ्गं	खड्गं
९९	२	श्तूयतामिदम्	श्रूयतामिदम्
१०४	९	यज्ज्ल	यज्जल
१३६	२	युंचानं	युंजानं

—: o :—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.